चण्डी, इन्द्राक्षीस्तोत्र

(०८०)

फो- १८८

श्री ग १

ॐ श्रीगणेशाय नमः ॥ ॐ नमः सरस्वत्यै ॥ ॐ

ॐ गजवदनमचिंत्यंतीक्ष्णदंष्ट्रंत्रिनेत्रं॥बृहदुदरम
शेषंभूतिराजंपुराणं॥अमरवरसुपूज्यंरक्तवर्णंसु
रेशं॥पशुपतिसुतमीशंविघ्नराजंनमामि॥१॥शि
वतनयवरिष्ठंसर्वकल्याणमूर्तिंपरशुकमलहस्तं
शोभितंमोदकैश्च॥अरुणकुसुममालाव्याललंबे

द्वंदं मम हृदय निवासं श्रीगणेशं नमामि ॥३॥ निज
मविषदबोधंसच्चिदानंदरूपंशह्नातिगुरुणमाध्यंयु
क्तियुक्तिप्रदंच ॥ हरजहरहगणैर्मिडतेब्रह्मरूपंजग
गदखिलनिवासंश्रीगणेशंनमामि ॥४॥ विमलक
नकवर्णंस्वर्णलक्ष्मीप्रदानंगजमुखकरुणाद्वंवेद्य
लत्कर्णोयुग्मं ॥ अभयवरदहस्तंमित्रपाशांकुशाढ्यं

श्री॰
ग॰
५

वरपतिगणमीशं स्वामिसर्वेप्रसीदं ॥ ४ ॥ विद्युय
यसलीलेप्रकोशावकाशं ॥ नववरदविविं
नमाखंपविंत्रं ॥ प्रणमपदविनाशं वंदेतोवंदेना
सकलसवविलासं श्रीगणेशं नमामि ॥ ५ ॥ इ
श्री गणेशपंचरत्नाकरस्तोत्रं संपूर्णम् ॥ ॐ न
भगवत्यैचंडिकायै ॥ प्रथमसमशांतिकाप्रणपमे

ॐ प्रणवं पूर्वमुद्धृत्य मायाबीजं ततः परं ॥ माया
कामं ततः क्रोधं तारं वाग्भवसंयुतं ॥ ह्रां भं मोहं त
तः यस्मात्कीलयेति त्रिभिर्वदेत् ॥ ॐ फ्रीं फ्रीं क्लीं क्रों
ॐ ऐं ह्रां भय मोहय उत्कील[illegible] य उत्कीलय उत्कील
य स्वाहा ॥ इति सप्तशतिकाशापमोचनं ॥ श्रेष्ठो
नरमानं जप्त्वा पश्चात्सप्तशतीं पठेत् ॥ ज म र ज्ञं त्रे ॥

उ. उग्रहोमविधानेन श्लोकैः श्लोकक्रमाकृति ॥ रक्षां
३ गकवचंमेचहोमंतत्रनकारये ॥ येमर्त्याःकवचंकृ
त्वाप्रतिवचनंनरेश्वर ॥ स्वदेहपातनंकृत्वायेनराः
कवचंकृनेन ॥ कवचाकृतिप्रभावेनरावलःप्रल
यंगतः ॥ ग्रंथकस्तुमहाबैन्योउग्रोहोमपरायणः ॥
कवचाकृतिप्रभावेनसोऽपिनाशंगतःकिल ॥ अथ

नवार्णवमंत्रः॥ आचम्य॥ प्राणायामं कृत्वा॥ ॐ अ
स्य श्रीनवार्णवमंत्रस्य॥ ब्रह्माविष्णुमहेश्वरा ऋष
यः॥ गायत्रीत्रिष्टुबनुष्टुप्छंदांसि॥ महाकालीम
हालक्ष्मीमहासरस्वत्यो देवताः॥ नंदाशाकंभरी
भीमाः शक्तयः रक्तदंतिकाभीमाभ्रामर्यो बीजानि
अग्निर्वायुः॥ सूर्यस्तत्त्वं॥ अभीष्टफलसिद्ध्यर्थे जपेवि

दु. ४

विनियोगः॥ इति संकल्पः॥ ब्रह्माविष्णुरुद्रेभ्यो
नमः शिरसि॥ गायत्रीत्रिष्टुबनुष्टुप्छंदेभ्यो नमः
मुखे॥ महाकालीमहालक्ष्मीमहासरस्वतीभ्यो
नमः हृदि॥ नंदाशाकंभरीभीमाभ्यो नमः दक्षस्त
ने॥ रक्तदंतिकाभीमाभ्रामरीभ्यो नमः वामस्त
ने॥ अग्निवायुसूर्येभ्यो नमः हृदि॥ इति ऋष्यादिन्या

मः॥ॐऐंह्रींक्लींचामुंडायैविच्चेइतिमूलेनकरौसं
शोध्य॥ॐऐंअंगुष्ठाभ्यांनमः॥ॐह्रींतर्जनीभ्यांन
मः॥ॐक्लींमध्यमाभ्यांनमः॥ॐचामुंडायैअना
मिकाभ्यांनमः॥ॐविच्चेकनिष्ठिकाभ्यांनमः॥
ॐऐंह्रींक्लींचामुंडायैविच्चेकरतलकरपृष्ठाभ्यां
नमः॥इतिकरन्यासः॥ॐऐंहृदयायनमः॥ॐह्रीं

३०
२

शिरसेस्वाहा॥ ॐ क्लीं शिवायैवषट्॥ ॐ चामुंडायै
कवचायहुं॥ ॐ विच्चे नेत्रत्रयाय वौषट्॥ ॐ ऐं ह्रीं
क्लीं चामुंडायै विच्चे अस्त्राय फट्॥ इति षडंगन्यासः
नेत्रान्यासः॥ ॐ ऐं नमः शिखायां॥ ॐ ह्रीं नमः
दक्षनेत्रे॥ ॐ क्लीं नमः वामनेत्रे॥ ॐ चां नमः दक्ष
कर्णे॥ ॐ मुं नमः वामकर्णे॥ ॐ डां नमः दक्षनासा

यां ॥ ओं विं नमः सृतौ ॥ ओं च्चे नमः गुह्ये ॥ एवं विन्य
स्य अष्टवारं मूलेन व्यापकं कुर्यात ॥ ओं ऐं प्राच्यै नमः
ओं ऐं आग्नेय्यै नमः ॥ ओं ह्रीं दक्षिणायै नमः ॥ ओं ह्रीं
नैरृत्यै नमः ॥ ओं क्लीं प्रतीच्यै नमः ॥ ओं क्लीं वायव्यै
नमः ॥ ओं चामुंडायै उदीच्यै नमः ॥ ओं विच्चे ईशान्यै
नमः ॥ ओं ऐं ह्रीं क्लीं चामुंडायै विच्चे ऊर्धायनमः ॥ ओं

३ ९

ॐऐंह्रींक्लींचामुंडायैविच्चेभ्यैनमः ॥ ततो ध्या
येत् ॥ शंखंचक्रंगदाबाणाञ्चापंपरिघत्रिशूलंके
भुशुंडींचशिरःखड्गंदधतींदशवक्त्रकां ॥ नामसी
षणमलंनौमिमहाकालींदशांघ्रिकां ॥ १ ॥ इति
महाकालीध्यानं ॥ मालांचपरशुंबाणान्नादांकु
लिशमेवच पद्मंधनुःकुंडिकांचदंडंशक्तिमसिं

तन्या॥ खेटकंजलजंघंटांसुराभाजंचसूलकं॥पा
शंसुदर्शनंचैवदधतींलोहितप्रभां॥पद्मस्थितां
महालक्ष्मींभजेमहिषमर्दिनीं॥२॥इतिमहाल
क्ष्मीध्यानं॥घंटाशूलंहलंशंखंमुसलंचधनुःश
रान्॥दधतींसुज्वलांभोमिदेवींगौरीसमुद्भवां
इतिमहासरस्वतीध्यानं॥३॥अथपूजाविधानं॥

दु. ७

ॐश्रीमन्त्रराजस्यराधाप्रवरणांभोरुहद्वयी। [illegible]
वरूनगडाश्रीचंडिकांप्रणमाम्यहं॥ ॐजातवेद
सेसुनवामसोममरातीयतोनिदहातिवेदः॥स
नःपर्षदतिदुर्गाणिविश्वानावेवसिंधुंदुरितात्य
ग्निः॥इतिमूलं॥अथन्यासः॥ॐजातनशिखायां
वेदसेललाटे [illegible] मकर्णयोः॥सोमंनासिका

यं॥ स्वरान्तिचक्षुषोः॥ पतञ्जोहयोः॥ निर्दन्ते ९॥
दन्तान्तिता [illegible]॥ वेदजिह्वायां॥ सग्रीवायां॥ नः
बाकोः॥ पर्वतहृदिप्रतिस्तनयोः॥ ऊरूद्वे॥ गो
त्रिनेत्रेभे॥ विश्वाहहे॥ नावापाण्योः॥ इवहृपण
योः॥ सिंधुशिरे॥ रुः करसे॥ हनऊर्वोः॥ प्रतिजंघ
योः॥ प्रतिः पादयोः इत्यं [illegible]:॥ ओं ज्ञातवे

दु.
८

दमेस्तनवामहृदयायनमः॥ सोममगातीयतः॰
शिरसेस्वाहा॥ निदहातिवेदः शिखायैवषट्॥॰
मनः पर्षदतिदुर्गाणिकवचायहुं॥ विश्वानावेव
सिंधुंनेत्राभ्यांवौषट्॥ दुरितात्यग्निःअस्त्रायफट्॥
इति षडंगः॥ ॐक्लांअंगुष्ठाभ्यांनमः॥ ॐक्लींतर्ज॰
नीभ्यांनमः॥ ॐक्लूंमध्यमाभ्यांनमः॥ ॐक्लैंअना

मिकाभ्यां नमः ॥ ॐ क्लौं कनिष्ठिकाभ्यां नमः ॥ ॐ
क्लः करतलकरपृष्ठाभ्यां नमः ॥ इति करन्यासः ॥
ॐ क्लां हृदयाय नमः ॥ ॐ क्लीं शिरसे स्वाहा ॥ ॐ क्लूं
शिखायै वषट् ॥ ॐ क्लैं कवचाय हुं ॥ ॐ क्लौं नेत्राभ्यां
वौषट् ॥ क्लः अस्त्राय फट् ॥ इति षडंगः ॥ इति न्यासं
कृत्वा पूजां कार्यां ॥ ॐ क्लौं श्री गणपतये नमः ॥ ॐ

उ.

क्लींश्रींक्षेत्रपालायनमः॥ॐक्लींश्रींतीक्ष्णशृंगाय
महिषायनमः॥ॐक्लींश्रींवनस्पतिभुञ्जायसिंहाय
नमः॥इतिद्वारार्चा॥ॐगंगुरवेनमः॥ॐपरमगु
रवेनमः॥ॐपरमेष्टिगुरवेनमः॥ॐपरमाचा
र्यायनमः॥आदिसिद्धेभ्योनमः॥इतिगुरुपूजा॥
ॐक्लींश्रींविमलवेनमः॥ॐक्लींश्रींवेसल्वेनमः॥

ह्रीं श्रीं रुद्रायनमः ॥ ॐ ह्रीं श्रीं रुद्राण्यैनमः ॥ ॐ
ॐ ह्रीं श्रीं ब्रह्मणेनमः ॥ ॐ ह्रीं श्रीं ब्रह्माण्यैनमः ॥ इ
तिऋवै ॥ ॐ ह्रीं श्रीं कौमार्यैनमः ॥ ॐ ह्रीं श्रीं ऐंद्र्यैन
मः ॥ ॐ ह्रीं श्रीं वाराह्यैनमः ॥ इत्य नैरे ॥ ॐ ह्रीं श्रीं व
टुकायैनमः ॥ ॐ ह्रीं श्रीं चामुंडायैनमः ॥ ॐ ह्रीं
श्रीं महालक्ष्म्यैनमः ॥ इति पश्चिमे ॥ ॐ ह्रीं श्रीं चा

इति दक्षिणे

मुंडेनमः॥ ॐह्रींश्रींचंद्रमूर्त्तयेनमः॥ ॐह्रींश्रींम
नमोभगवतिमहाउग्रेचंडिकात्यायनिनमः॥ इ
तिमूलत्रयं॥ ॐनमःपिशिनाशिनिकिलिकि
लिचिस्थूलखड्गहस्तेसिंहारूढेपहिपहि॥ आग
छआगच्छबलिंगृह्णंगृह्णगृह्णसिद्धिंकुरुकु
रु॥ ॐह्रींश्रींचंडिकायैनमःइत्यावाहनं॥ ॐ

श्रीविंध्यवासिन्यैनमः॥ॐह्रींश्रीरक्तदंतिकायैन
मः॥ॐह्रींश्रीशताक्ष्यैनमः॥ॐह्रींश्रीशाकंभर्यै
नमः॥ॐह्रींश्रीभीमायैनमः॥ॐह्रींश्रीभ्रामर्यैन
मः॥इत्यावरणं॥ॐह्रींश्रीचामुंडेपाद्यंगृहाणन
मः॥अर्घ्यंगृहाणनमः॥धूपंगृहाणनमः॥दीपंगृ
हाणनमः॥गंधंगृहाणनमः॥पुष्पंगृहाणनमः

३. ॐह्रींश्रींचंडिकेचामुंडेगणपतिक्षेत्रपालसहिते
॥ बलिंगृहाणस्वाहा॥ अमनलपानैयक्षेत्रपालायनमः
अनेनविधिनायस्तुपूजयित्वावबावयेत्॥ तस्मैदे
व्यप्रसन्नातिवितरंतिमहद्धनं॥ अनेनविधिनाय
स्तुविहीनंपुस्तकंपठेत्॥ तस्यजप्यंभवेद्व्यर्थंमरा
लेपरुधिरंयथा॥ ददातिविपुलांसिद्धिंददातिवि

पुष्पं धूपं॥ यो जपेत्स्वच्छबुद्धिः स्यात्सेमं प्राप्नोति शा
श्वतं॥ पुस्तकं समप्रशातिक्रमनेन विधिनार्चयेत्॥ स
र्वान्कामानवाप्नोति रुद्रस्य वचनं यथा॥ ३ ॥ इति श्री
विधानं॥ स्त्रहोमसंस्थापनायत्नपहरणविधौमा
हेने तु गृहेपि स्वैषामर्गलानां निजमहिमवशा
द्भक्तमेलैवयालं॥ नित्यं क्रीडाप्रसक्तारवयतिस

३ कल्पं स्वात्मशक्त्या ग्रुणं वं मानस्त्राणमाश्रयादभिम
१२ तफलदा भद्रकालीव काली ॥ ॐ अस्य श्रीदेवीकव
चस्तोत्रमंत्रस्य ॥ ब्रह्माऋषिः ॥ अनुष्टुप्छंदः महा
मायादेवता ॥ ॐ ह्रीं बीजं श्रीं शक्तिः ॥ ॐ क्लीं कील
कं ॥ महामायाप्रीत्यर्थे पाठे विनियोगः ॥ कवच
स्य ऋषिर्ब्रह्मा छंदोनुष्टुप्कीर्तितः ॥ देवतास्त्रा

नांज्ञानीमहामायेतिविश्रुता॥ श्रीमार्कंडेयउ
वाच॥ यद्गुह्यंपरमंलोकेसर्वरक्षाकरंनृणां॥ यन्न
कस्यचिदाख्यातंतन्मेब्रूहिपितामह॥१॥ ब्रह्मोवाच
॥ अस्तिगुह्यतमंविप्रसर्वभूतोपकारकं॥ देव्यास्तुक
वचंपुण्यंतच्छृणुष्वमहामुने॥२॥ प्रथमंशैलपुत्रीति
द्वितीयंब्रह्मचारिणी॥ तृतीयंचंद्रघंटेतिकूष्मांडे

३० तिचतुर्थकं ॥४॥ पंचमं स्कंदमातेति षष्ठं कात्यायनीति
२४ च ॥ सप्तमं कालरात्रीति महागौरीति चाष्टमं ॥५॥ नव
मं सिद्धिदात्रीति नवदुर्गाः प्रकीर्तिताः ॥ उक्तान्येतानि
नामानि ब्रह्मणैव महात्मना ॥६॥ अग्निना दह्यमान
स्तु शत्रुमध्ये गतो रणे ॥ विषमे दुर्गमे चैव भयार्ताः श
रणं गताः ॥७॥ नापदस्तेषु पश्यंति शोकदुःखभयंक
नतेषां जायते किंचिदशुभं रणसंकटे ।

री॥ यैस्तुभक्त्यास्मृतानूनंतेषांवृद्धिःप्रजायते॥७॥ ये
त्वांस्मरंतिदेवेशिरक्षसेतान्नसंशयः॥ प्रेतसंस्थातु
चामुंडावाराहीमहिषासना॥८॥ ऐंद्रीगजसमारूढावै
ष्णवीगरुडासना॥ माहेश्वरीवृषारूढाकौमारीशि
खिवाहना॥९॥ लक्ष्मीपद्मासनादेवीपद्महस्ताहरि
प्रिया॥ श्वेतरूपधरादेवीईश्वरीवृषवाहना॥१०॥ ब्रा

३. स्त्रीहं ससमाःसृत्ला सर्वाभरणभूषिता ॥ नानाभरण
१४ शोभाढ्या नानारत्नोपशोभिताः ॥ हृष्टंपतेरथमा
सूलादेव्याः क्रोधसमाकुलाः ॥ शंखं चक्रं गदां शक्तिं
हलं च मुसलायुधं ॥ य ॥ खेटकं तोमरं चैव परशुंपा
शमेव च ॥ कुन्तायुधं त्रिशूलं शार्ङ्गमायुधमुत्तमं ॥ ४
दैत्यानां देहनाशाय सर्वसत्त्वाभयाय च ॥ यारपं

स्यातुधानीत्वंदेवानांत्वहितायवै ॥ १४ ॥ ममस्तेस्तु
महारौद्रेमहाघोरपराक्रमे ॥ महाबलेमहोत्सा
हेमहाभयविनाशिनि ॥ १५ ॥ त्राहिमांदेविदुष्प्रे
क्ष्येशत्रूणांभयवर्धिनि ॥ नानायुधसमायुक्ताना
नावर्णासमन्विता ॥ १६ ॥ नाशयेत्सर्वदुःखानिदेवी
हृदयंसंस्थिता ॥ श्वेतसिंहासनारूढामननमातेश्या

३५
१९

गामिनी ॥५४॥ मारयित्वा भवद्दुलालाग्रथं वमते
श्वर: ॥ विस्मर्महारथो देव्या भद्रकाल्या महाशय:
वस्त्रमाल्यावृता देवी घंटाभरणभूषिता ॥ मौक्ति
कैर्भूषिताश्चैव देवी हारवलंबिनी ॥५५॥ इंद्रनीलै
र्महानीलैः पद्मरागैश्च भूषिता ॥ वैडूर्यो[illegible]र्महोत
हैर्नानारत्नसमन्विता ॥५६॥ सा व्यांरत्नमा[illegible]सी

ग्नेयामग्निदेवता॥ दक्षिणस्यांतथावाराहीनैऋ
त्यांखड्गधारिणी॥२२॥ प्रतीच्यांवारुणीरक्षेद्वाय
व्यांमृगवाहना॥ उदीच्यांचैवकौमारीईशान्यां
शूलधारिणी॥२३॥ ऊर्ध्वंरक्षतब्रह्माणीअधस्ता
द्वैस्नवीतथाएवंदशादिशोरक्षेच्चामुंडाशववाहना
॥२४॥ जयामेचाग्रतः[illegible]ातुविजयास्यात्तुपृष्ठतः

अजिता वामपार्श्वे तु दक्षिणे चापराजिता ॥२०॥ शि
३. खामुद्योतिनी रक्षेदुमा मूर्ध्नि व्यवस्थिता ॥ माला
२६ धरी ललाटे च भ्रुवौ रक्षेद्यशस्विनी ॥२१॥ त्रिनेत्रा च
भ्रुवोर्मध्ये यमघंटा च नासिके ॥ शंखिनी चक्षुषो
र्मध्ये श्रोत्रयोर्द्वारवासिनी ॥२२॥ कपोलौ कालिका
रक्षेत्कर्णमूले तु शांकरी ॥ नासिकायां सुगंधा च उ

त्तरोष्टेतुचर्चिका॥१८॥अधरेचामृतकलाजिह्वायां
चसरस्वती॥दंतान्रक्षतुकौमारीकंठदेशेचचंडिका
॥१९॥घंटिकांचित्रघंटाचमहामायाचतालुके॥का
माक्षीचिबुकंरक्षेद्वाचंमेसर्वमंगला॥२०॥ग्रीवायां
भद्रकालीचपृष्ठवंशेधनुर्धरी॥नीलग्रीवाबहिःकं
ठेनलिकांनलकूबरी॥२१॥खड्गधारिण्युभौस्कंधौ

बाहुभ्रवज्रधारिणी ॥ हस्तौ मे दंडिनी रक्षेदंबिका चां
३ गुलीषु च ॥ ३१ ॥ नखान्शूलेश्वरी रक्षेत्कुक्षौ रक्षेत्कु
२ लेश्वरी ॥ स्तनौ रक्षेन्महादेवी मनःशोकविनाशिनी
हृदये ललितादेवी उदरे शूलधारिणी ॥ नाभिं च का
मिनी रक्षेद्गुह्यं गुह्येश्वरी तथा ॥ ३२ ॥ पूतना कामिका
मेढ्रं गुदे महिषवाहिनी ॥ कट्यां भगवती रक्षेज्जानु

नीविंध्यवासिनी ॥२५॥ जंघे महाबलारक्षेत्सर्वका
मप्रदायिनी ॥ गुल्फयोर्नारसिंही च पादपृष्ठे तु तैजसी
२६॥ पादांगुलीषु श्री रक्षेत्पादाधःस्थलवासिनी ॥ दं
ष्ट्राकरालिनी रक्षेत्केशांश्चैवोर्ध्वकेशिनी ॥२७॥ रोम
कूपेषु कौमारी त्वचं वागीश्वरी तथा ॥ रक्तमज्जावसा
मांसान्यस्थिमेदांसि पार्वती ॥२८॥ अंत्राणि कालरात्री

३. चपित्तंचमुकुटेश्वरी।पद्मावतीपद्मकोशेकफेचू
२८. डामणिस्तथा॥४९॥ज्वालामुखीनखज्वालामभे
द्यासर्वेसंधिषु॥शुक्रंब्रह्माणीमेरक्षेच्छायांछत्रेश्व
रीतथा॥५०॥अहंकारंमनोबुद्धिंरक्षेन्मेधर्मधारि
णी॥प्राणापानौतथाव्यानंसमानोदानमेवच॥५१
नागंकूर्मंचकृकरंदेवदत्तंधनंजयं॥वज्रहस्तात

मेरदेवस्यागकल्पं सुशोभनं ॥४५॥ रसं रूपं च गंधं च
शब्दस्पर्शं च योगिनी ॥ सत्वं रजस्तमश्चैव रुद्रदेवा
गायत्री सदा ॥४६॥ आश्रुरदत्तुवाराही पर्मेरदत्त
वैष्णवी ॥ यशःकीर्तिं च लक्ष्मीं च सदा रदत्तं च कि
ली ॥४७॥ गोत्रमिंद्राणी मेरदेवस्य मूल मेरदवंदि
के ॥ ऐंद्री श्वरी ध्रुनं रदेव्कौमारी कन्यकस्तथा ॥४८

दे.
१९

श्मशाने दहने महादेवी भार्यां रक्षतु भैरवी ॥ पंथाने सं
पथ्यां दहेन्मार्गे क्षेमंकरी तथा ॥४१॥ राजद्वारे म
हालक्ष्मी विजयः सर्वतः स्थिता ॥ रक्षाहीनं तु य
त्स्थानं वर्जितं कवचेन तु ॥४२॥ तत्सर्वं रक्ष मे देवि
जयंती पापनाशिनी ॥ रक्ष मे सर्वगात्राणि दुर्गे दुर्ग
प्रनाशिनि ॥४३॥ सर्वरक्षाकरं पुण्यं कवचं सर्वदा

जपेत ॥ इदं रहस्यं विप्रर्षे भक्त्या न व मयोदितं ॥ ८
पदमेकं न गच्छेत्तु यदीच्छेच्छुभमात्मनः ॥ कवचेना
वृतो नित्यं यत्र यत्रैव गच्छति ॥ ९ ॥ तत्र तत्रार्थलाभ
श्च विजयः सर्वकामिकः ॥ यं यं चिंतयते कामं तं तं
प्राप्नोति निश्चितं ॥ १० ॥ परमैश्वर्यमतुलं प्राप्नोति भू
तले पुमान् ॥ निर्भयो जायते मर्त्यः संग्रामेष्वपराजि

दु. नः॥२१॥त्रैलोक्येतुभवेन्मान्यःकवचेनावृतःशुभान्
२० इदंतुदेव्याकवचंदेवानामपिदुर्लभं॥२२॥यःपठेत्
प्रातरुत्थायत्रिसंध्यंश्रद्धयान्वितः॥देवीकलाभवे
त्तस्यत्रैलोक्येष्वपराजितः॥२३॥जीवेद्वर्षशतंसाग्रम
पमृत्युविवर्जितः॥नश्यंतिव्याधयःसर्वेलूताविस्फो
टकादयः॥२४॥स्थावरंजंगमंचैवकृत्रिमंचापिय

द्विषं ॥ अभिचाराणिसर्वाणिमंत्रयंत्राणिभूतले ॥ ४१
भूचराःखेचराश्चैवकुलजाश्चोपदेशिकाः ॥ सहजा
कुलजामालाडाकिनीशाकिनीतथा ॥ ४२ ॥ अंतरि
क्षचराघोराःडाकिन्यश्चमहाबलाः ॥ ग्रहभूतपि
शाचाश्चयक्षगंधर्वराक्षसाः ॥ ४३ ॥ ब्रह्मराक्षसवे
तालाःकूष्मांडाभैरवादयः ॥ नश्यंतिदर्शनात्तस्य

दु॰ श्रवचेहृदिसंस्थिते ॥५९॥ मानोन्नतिर्भवेज्ज्ञातंतेजो
हरिकरंपरं ॥ यशसावर्धतेसोपिकीर्तिमंडितभूत
२१ ले ॥६०॥ जपेत्सप्तशतींचंडींकृत्वातुकवचंपुरा ॥ या
वद्भूमंडलंधत्तेसशैलवनकाननं ॥६१॥ तावत्तिष्ठ
तिमेदिन्यांसंततिःपुत्रपौत्रिका ॥ देहांतेपरमंस्था
नंयत्सुरैरपिदुर्लभं ॥६२॥ प्राप्नोतिपुरुषोनित्यंम

हामायाप्रसादतः ॥२४॥ इतिश्रीहरिहरब्रह्माविर
चितंदेव्याकवचंसमाप्तं ॥ ॐशिरोरक्षतुब्रह्माणीमु
खंमाहेश्वरीतथा ॥ ग्रीवांरक्षतुकौमारीस्कंधोरक्ष
तुवैष्णवी ॥१॥ वाराहीचकटिंगुह्येमैंद्रीचाहूमदामम
वाम्हेंअजानुदेशंतपादौरक्षतुचंडिका ॥२॥ हृत्का
टिकांभुजौपृष्ठंदशाणादभुजाननना ॥ श्रेगग्रस्थंगसंधी

दे.
२२

श्रुमदारत्वंतमातरः॥ ३॥ विनायकोमहेशश्रुकृ
हन्तामीप्सितंसदा॥ नमोविष्णुविरिंचीशतेजःपुं
जमसुद्भवे॥ ४॥ अष्टादशभुजेदुर्गेशूलमुद्गरधारि
णि॥ पीतांबरधरेदेविशंखशंकसहस्राननें॥ ५॥ नी
लोत्पलदलश्यामेदैत्यानांबलनाशिनि॥ अदिति
स्वदितिश्चैवविनतासिद्धिरेवच॥ ६॥ राधिनिर्ज्ञास

भाकांतिर्बुद्धिर्लक्ष्मीसरस्वती ॥ धृतिः कीर्तिः स्व
धा स्वाहा त्वमेव वरवर्णिनि ॥ २ ॥ त्वामेव ये पठिष्यं
ति सर्वकामप्रसंशुभे ॥ नवम्यां शुक्लपक्षे तु श्रद्धा
त्रैलोक्यमातरः ॥ ३ ॥ तेषां तु वरदा देवि मम विघ्नवि
नसंशयः ॥ कंदरेषु च शैलानां वनानां गहनेषु च
२ ॥ नमोस्तु ते विशालाक्षि नमोस्तु परमेश्वरि ॥ स्ती

क॰
२२

दं कवचं श्रुत्वा ब्रस्तोत्रं सर्वकामदं ॥१०॥ त्रिसंध्यं
स्तौति यस्तस्य त्रिशक्तिः सर्वसिद्धिदा ॥११॥ इति श्री
ब्रस्तोत्रं कवचं समाप्तं ॥ ॐ अस्य श्रीदेवीमाहात्म्ये
प्रथमार्गलस्तोत्रमंत्रस्य ॥ मार्कंडेयमेधाब्रह्मा
दय ऋषयः ॥ महिषासुरसंहारिणी मधुकैटभ
मर्दिनी धूम्रलोचनचंडमुंड [illegible] रक्तबीजसं

णि

भनिसंभसंहारिण्यो देवता॥ श्रनुष्टुब्त्रिष्टुब्जगत्य
तिधृतिछंदांसि॥ यद्वाग्वदंतीति बीजं॥ देवींवा
चमजनयंतदेवा इति कीलकं॥ ॐ इति शक्तिः॥
श्रीदेवीप्रसादसिद्ध्यर्थं पाठे विनियोगः॥ श्रर्ग
लेदुरितंहंति कीलकं फलदं तथा॥ कवचं रक्ष
येन्नित्यं चामुंडां चितयंजपेत्॥ श्रर्गले कीलकं

दु॰
२४

चादौपठित्वाकवचंजपेत॥जपेत्सप्तशतींपश्चात्
क्रमएषशिवोदितः॥अर्गलंहृदयेयस्यतथानर्ग
लेवागसौ॥भविष्यतीतिनिश्चित्यशिवेनरचितं
पुरा॥३॥कीलकंहृदयेयस्यसकीलितमनोरथः
भविष्यतिनसंदेहोनान्यथाशिवभाषितं॥४॥क
वचंहृदयेयस्यसवज्रकवचःखलु॥ब्रह्माणि

सिंतेशूर्वेमितिनिनिश्रीस्यचेतसा ॥ अथार्गलाव ॥ ज
यंतीमंगलाकालीभद्रकालीकपालिनी ॥ दुर्गा
क्षमाशिवाधात्रीस्वाहास्वधानमोस्तुते ॥ १ ॥ ज
यत्वंदेविचामुंडेजयभूतप्रहारिणि ॥ जयसर्वग
तेदेविकालरात्रिनमोस्तुते ॥ २ ॥ मधुकैटभविद्रा
विविधातृवरदेनमः ॥ रूपंदेहिजयंदेहियशोदे

३. ह्रिंह्रिंषोज्जह्रिं ॥८॥ मह्रिंणास्तुरानिर्नाणप्रणत्रवरदे
१५ नमः॥ रूपंदेहिजयंदेहियशोदेहिंह्रिंशोजह्रिं॥९
वंदितांघ्रियुगेदेविदेविसोभाग्यदायिनि॥ रूपंदेहि
१०॥ रक्तबीजांतकेदेविचंडमुंडविनाशिनि॥ रूपं॥
११॥ शुंभस्यचनिशुंभस्यधूम्राक्षमवमर्दिनि॥ रूपं
१२॥ प्रविंत्यरूपचरितेसर्वशत्रुविनाशिनि॥ रूपं

१३ ॥ नतेभ्यः सर्वदा भक्त्या चंडिके दुरितापहे ॥ रूपं
१४ ॥ स्तुवद्भ्यो भक्तिपूर्वं त्वां चंडिके व्याधिनाशिनि ॥
रूपं ॥ १५ ॥ चंडिके सततं ये त्वामर्चयंतीह भक्तितः ॥
रूपं ॥ १६ ॥ देहि सौभाग्यमारोग्यं देहि देवि परं सुखं
रूपं ॥ १७ ॥ विधेहि द्विषतां नाशं विधेहि बलमुच्चकैः
रूपं ॥ १८ ॥ विधेहि देवि कल्याणं विधेहि परमां श्रियं

उ:
२९

ह्रूं फं ॥ १९ ॥ सुरासुरशिरोरत्ननिघृष्टचरणेंविके ॥ ह्र
फं ॥ २० ॥ विद्यावंतं यशस्वंतं लक्ष्मीवंतं जनं कुरु
ह्रूं फं ॥ २१ ॥ प्रचंडदैत्यदर्पघ्ने चंडिके प्रणताय मे ॥ ह्र
फं ॥ २२ ॥ चतुर्भुजे चतुर्वक्त्रसंस्तुते परमेश्वरि ॥ ह्रूं फं
॥ २३ ॥ कृष्णेन संस्तुते देवि शश्वद्भक्त्या सदांबिके ॥ ह
ह्रूं फं ॥ २४ ॥ हिमालयसुतानाथसंस्तुते परमेश्वरि

रूपं॰ ॥१९॥ इंद्राणीपतिसद्भावपूजितेपरमेश्वरि
रूपं॰ ॥२०॥ देविप्रचंडदोर्दंडदैत्यदर्पविनाशिनि ॥ रू
पं॰ ॥२१॥ देविभक्तजनोदामदत्तानंदोदयेंबिके
रूपं॰ ॥२२॥ पत्नीमनोरमांदेहिमनोवृत्तानुसारि
णीं ॥ तारिणींदुर्गसंसारसागरस्यकुलोद्भवां ॥
इदंस्तोत्रंपठित्वातुमहास्तोत्रंपठेन्नरः ॥ सप्तश॰

ॐ अस्य श्री किलक मंत्रस्य महादेव ऋषि महामाया देव
अनुष्टुप् छंद भूत प्रेत पिसाचादि दोष विनासनार्थे पाठ जप

मशांतीसंख्याफलमाप्नोति संपदः ॥ ३ ॥ इति श्री
३. अर्गलस्तुति ॥ ॐ विशुद्धज्ञानदेहाय त्रिवेदीदिव्य
१२ चक्षुषे ॥ श्रेयःप्राप्तिनिमित्ताय नमः सोमार्ध
धारिणे ॥ सर्वमेतद्विनायस्तु मंत्राणामपि की
लकं ॥ सोपि क्षेममवाप्नोति सर्वमेव न संशयः ॥
१ ॥ सिध्यंत्युच्चाटनादीनि वस्तूनि सकलान्यपि

...योगः॥

एतेनस्तवमात्रेदेविस्तोत्रवृंदेनसिद्ध्यति ॥३॥ नमं
त्रेनौषधंनयंत्रनकिंचिद्पिविद्यते ॥ विनाजाप्ये
नसिद्ध्यतिसर्वमुच्चाटनादिकं ॥४॥ समयाल्प
पिसिध्यंतिलोकशंकाविमोहरः ॥ कृत्वानिमं
त्रयामासस्सर्वमेवमिदंशुभं ॥५॥ स्तोत्रंवैवेडिका
पास्तनत्वग्रह्यंचकारसः ॥ समाप्नोतिसुप्रल्पे

पु:
२८

नतो यथा वह्निमेत्रणो ॥ ६ ॥ कुल्लायां वा चतुर्दश्यां नव
म्यां वा समाहितः ॥ ददाति प्रतिगृह्णाति नित्यं वै वी
प्रसिध्यति ॥ ७ ॥ इत्थं रूपेण कौलेन महादेवेन की
लिते ॥ योनिः कौलं विधायैनां नित्यं जपति संस्फुटं
८ ॥ स सिद्धः स गणः सोपि गंधर्वो जायते ध्रुवं ॥ न चै
वाप्यटतस्तस्य भयं क्वापि न जायते ॥ ९ ॥ नापुत्रस्य

वसंपातिस्वतेमोत्तमवाप्नुयात् ॥ज्ञात्वाप्रारभ्यकु
र्वीतस्वकर्मकणेविनश्यति ॥९॥ ततोज्ञात्वैवसंपन्न
मिदंप्रारभ्यतेबुधैः ॥सौभाग्यादिवयत्किंचिद्दृश्यते
ललाजनैः ॥११॥ तस्यैवत्वप्रसादेनततोज्ञाप्यमिदंकृ
तं ॥ यानैलुर्जल्पमानैस्मिंस्तोत्रेसंपतिरुच्चकैः ॥भ
वत्येवसंमयार्पितंततः प्रारभ्यमेवतत् ॥१२॥ येस्मर्यं

उ. ५९

त्वत्प्रसादेनसौभाग्यारोग्यसंपदः॥शत्रुहानिःप
रोमोक्षःस्तूयतेसानकिंजनैः॥१४॥इतिश्रीमहा
देवप्रोक्तंकीलकस्तोत्रंसंपूर्णं॥ॐअस्यश्रीसप्तश
तिकामालामंत्रस्य॥प्रथमचरित्रस्य॥ब्रह्माऋषिः
महाकालीदेवता॥गायत्रीछंदः॥नंदजाशक्तिः॥
रक्तदंतिकाबीजं॥अग्निस्तत्त्वं॥महाकालीप्रीत्यर्थे

ऐं ह्रीं क्लीं २

मध्यमचरित्रस्य ॥ विष्णुऋषिः ॥ महालक्ष्मीर्देवता
उष्णिकछंदः ॥ शाकंभरीशक्तिः ॥ दुर्गाबीजं ॥ वायु
स्तत्वं ॥ महालक्ष्मीप्रीत्यर्थे ॥ सप्तशतिकाप्रथम
चरित्रपाठेहोमेविनियोगः ॥ महाकालीमहाल
क्ष्मीमहासरस्वतीध्यात्वामानसैरुपचारैःसंपूज्य
श्लोकेनवंशतेजस्त्वावाहस्रजंकृत्वासप्तशतींपठेत

सेव्यास्तैस्तुनर्मूलमत्रेणरक्षांतंप्रतिदिनंजपेदि
तिविधिः॥ ॐबीजत्रयायविद्महेतत्प्रधानायधी
महि॥तन्नोशक्तिःप्रचोदयात॥इतिगायत्री॥सूत
उवाच॥तपस्यंतंमहात्मानंमार्कंडेयमहामुनिः
आसाद्यशिष्योमहातेजाजैमिनिःपर्यपृच्छत॥१॥जैमु
निरुवाच॥महर्षेःकथयोत्पत्तिंचंडिकायाःसविस्त

रात् ॥ ययासर्वमिदंव्याप्तंत्रैलोक्यंसचराचरं ॥ २ ॥
सावर्णिरितियःपूर्वंकथ्यतेमनुरष्टमः ॥ तस्य
स्वरूपतेजस्सर्वंतद्वदस्वममसुव्रत ॥ ३ ॥ मन्वंतरेषु
रस्वामिश्रोहितेनप्रकाशितं ॥ सावर्णिकोमनुः
र्नोमवसंख्यातस्त्वयाममं ॥ ४ ॥ तदुत्पत्तिंमहायो
गिन्सर्वंतद्वदविस्तरात् ॥ परोपकारहेत्वर्थंतथा

दु॰
३१

पिप्रणतस्यमे ॥५॥ ॥ खड्गंचक्रगदेषुचापपरिघान्
शूलंभुसुंडीशिरः ॥ शंखंसंदधतींकरैस्त्रिनयनांस
र्वांगभूषावृतां ॥ यामस्तौत्स्वपितेहरौकमलजो
हंतुंमधुकैटभं ॥ नीलाश्मद्युतिमास्यपाददशकां
सेवेमहाकालिकां ॥ इतिमहाकालीध्यानं ॥ मार्कं
डेयउवाच ॥ सावर्णिःसूर्यतनयोयोमनुःकथ्यते

ष्टमः॥ निशामयतदुत्पत्तिंविस्तराद्गदतोमम॥१॥स
हामायानुभावेनयथामन्वंतराधिपः॥सबभूवमहा
भागसावर्णिस्तनयोरवेः॥२॥स्वारोचिषेंतरेपूर्वंचै
त्रवंशसमुद्भवः॥सुरथोनामराजाभूत्समस्तेक्षि
तिमंडले॥३॥तस्यपालयतःसम्यक्प्रजाःपुत्रानि
वौरसान्॥बभूवुःशत्रवोभूपाःकोलाविध्वंसिनस्त

उ.
३२

दा ॥ ४ ॥ तस्यैतैरभवद्युद्धमतिप्रबलदंडिनः ॥ न्यू
नैरपिसतैर्युद्धेकोलाविध्वंसिभिर्जितः ॥ ५ ॥ ततः
स्वपुरमायातोनिजदेशाधिपोभवत् ॥ आक्रांतः
समहाभागस्तैस्तदाप्रबलारिभिः ॥ ६ ॥ अमात्यै
र्बलिभिर्दुष्टैर्दुर्बलस्यदुरात्मभिः ॥ कोशोबलंचा
पहृतंतत्रापिस्वपुरेततः ॥ ७ ॥ ततोमृगयाव्याजे

न्नहृतस्वाम्यः सभूपतिः ॥ एकाकीहयमारुह्यज
गामगहनेवने ॥ ८ ॥ सतत्राश्रममद्राक्षीद्दिजव
र्यस्यमेधसः ॥ प्रशांतश्वापदाकीर्णंमुनिशिष्यो
पशोभितं ॥ ९ ॥ तस्थौकिंचित्सकालंचमुनिना
तेनसत्कृतः ॥ इतश्चेतश्चविचरंतस्मिन्मुनिवरा
श्रमे ॥ १० ॥ सोचिंतयत्तदातत्रममत्वाकृष्टमानसः

उ॰
३३

मत्पूर्वैः पालितं पूर्वं मया हीनं पुरं हि तत् ॥ ११ ॥ मद्भृ
त्यैस्तैरसद्वृत्तैर्धर्मतः पाल्यते न वा ॥ न ज्ञाने स प्रधानो
मे शूरहस्ती सदामदः ॥ १२ ॥ मम वैरिवशं यातः का
न्भोगानुपलप्स्यते ॥ ये ममानुगता नित्यं प्रसाद
धनभोजनैः ॥ १३ ॥ अनुवृत्तिं ध्रुवं तेद्य कुर्वंत्यन्यम
हीभृतां ॥ असम्यग्व्ययशीलैस्तैः कुर्वद्भिः सततं

व्ययं ॥१४॥ संचितःसोतिदुःखेनक्षयंकोशोगमिष्य
ति ॥ एतच्चान्यच्चसततंचिंतयामासपार्थिवः ॥१५॥
तत्रविप्राश्रमाभ्यासेवैश्यमेकंददर्शसः ॥ सपृष्ट
स्तेनकस्त्वंभोहेतुश्चागमनेत्रकः ॥१६॥ सशोकइव
कस्मात्त्वंदुर्मनाइवलक्ष्यसे ॥ इत्याकर्ण्यवचस्तस्य
भूपतेःप्रणयोदितं ॥१७॥ प्रत्युवाचसतंवैश्यःप्रश्र

दे॰ यावन्तो नरप ॥ वैश्य उवाच ॥ समाधिर्नाम वैश्योऽहं
३४ मुत्पन्नो धनिनां कुले ॥ पुत्रदारैर्निरस्तश्च धनलोभा
दसाधुभिः ॥१८॥ विहीनः स्वजनैर्दारैः पुत्रैरादाय
मे धनं ॥ वनमभ्यागतो दुःखी निरस्तश्चाप्तबंधुभिः
१९॥ सोऽहं न वेद्मि पुत्राणां कुशलाकुशलात्मिकां ॥
प्रवृत्तिं स्वजनानां च दाराणां चात्र संस्थितः ॥२०॥

किंनुतेषांगृहेक्षेममक्षेमंकिंनुसांप्रतं॥कथंतेकिं
नुसद्वृत्ताःदुर्वृत्ताःकिंनुमेसुताः॥२१॥राजोवाच॥
यैर्निरस्तोभवाल्लुब्धैःपुत्रदारादिभिर्धनैः॥तेषुकिं
भवतस्नेहमनुबध्नातिमानसं॥२२॥वैश्यउवाच॥
एवमेतद्यथाप्राहभवानस्मद्गतंवचः॥किंकरोमि
नबध्नातिममनिष्ठुरतांमनः॥२३॥यैःसंत्यज्यपि

दु.
३५

तृस्नेहंधनलुब्धैर्निराकृतः॥पतिःस्वजनहार्दंचहा
र्दितेष्वेवमेमनः॥२४॥किमेतन्नाभिजानामिजा
नन्नपिमहामते॥यत्प्रेमप्रवणंचित्तंविगुणेष्वपि
बंधुषु॥२५॥तेषांकृतेमेनिःश्वासोदौर्मनस्यंचजा
यते॥करोमिकिंयन्नमनस्तेष्वप्रीतिषुनिष्ठुरं॥२६॥
मार्कंडेयउवाच॥ततस्तौसहितौविप्रतंमुनिंसमा

मुपस्थितौ ॥ समाधिर्नामवैश्योसौसचपार्थिवस
त्तमः ॥ २७ ॥ कृत्वातुतौयथान्यायंयथार्हंतेनसंवि
दं ॥ उपविष्टौकथाःकाश्चिच्चक्रतुर्वैश्यपार्थिवौ ॥
२८ ॥ राजोवाच ॥ भगवंस्त्वामहंप्रष्टुमिच्छाम्येकंव
दस्वतत् ॥ दुःखाययन्मेमनसःस्वचित्तायत्ततांवि
ना ॥ २९ ॥ ममत्वंगतराज्यस्यराज्यांगेष्वखिलेष्वपि ॥

दुं
स

जानतोपि यथाप्यस्य किमेतन्मुनिसत्तमः ॥ ३० ॥ स्व
यं च निःकृतः पुत्रैर्दारैर्भृत्यैस्तथोज्झितः ॥ स्वज
नेन च संत्यक्तस्तेषु हार्दी तथाप्यति ॥ ३१ ॥ एवमे
ष तथाहं च द्वावप्यत्यंतदुःखितौ ॥ दृष्टदोषेपि वि
षयेषु ममत्वाकृष्टमानसौ ॥ ३२ ॥ तत्किमेतन्महा
भाग यन्मोहो ज्ञानिनोरपि ॥ ममास्य च भवत्येषा

विवेकांधस्यमूढता॥३३॥ऋषिरुवाच॥ज्ञानम
स्तिसमस्तस्यजंतोर्विषयगोचरे॥विषयाश्चमहा
भागयांतिचैवंपृथक्पृथक्॥३४॥दिवांधाःप्राणि
नःकेचिद्रात्रावंधास्तथापरे॥केचिद्दिवातथारात्रौ
प्राणिनस्तुल्यदृष्टयः॥३५॥ज्ञानिनोमनुजाःसत्यं
किंतुतेनहिकेवलं॥यतोहिज्ञानिनःसर्वेपशुप

३ः
३२

त्तिमग्गाद्दुघः ॥ ३६ ॥ जाणे च नस्सत्तुच्छाणं यनेघांसं
गपत्तिणं ॥ मत्तुच्छाणं च यनेघां तुल्यमन्यतयो ।
भयोः ॥ ३७ ॥ जाने पि सत्यपश्येना स्यतेगा क्षाव चेत्तु
७ ॥ करणमो ता हता स्मो ह्रा स्थोज्ञ मा ना न पिद्धु धा ॥
३८ ॥ मात्तुच्छा मनुर्जव्याह्य साभिलाषाः स्तुता स्तुति ।
लोभात्यक्त्वा पकाराय नत्वे तान्किं न पश्य पस्ति ॥ ३९ ॥

तथापि ममतावर्ते मोहगर्ते निपातिताः ॥ महामा
याप्रभावेन संसारस्थितिकारिणः ॥ ४ ॥ तन्नात्र वि
स्मयः कार्यो योगनिद्रा जगत्पते ॥ महामाया हरे
श्चैषा तया संमोह्यते जगत् ॥ ५ ॥ ज्ञानिनामपि चे
तांसि देवी भगवती हि सा ॥ बलादाकृष्य मोहाय
महामाया प्रयच्छति ॥ ५२ ॥ तया विसृज्यते विश्वं जगत्

दुं.
१८

देतत्त्वगोचरे ॥ सैषाप्रसन्नावरदानृणांभवतिमुक्त
ये ॥४३॥ साविद्यापरमामुक्तेर्हेतुभूतासनातनी
संसारबंधहेतुश्चसैवसर्वेश्वरेश्वरी ॥४४॥ राजोउ
वाच ॥ भगवन्काहिसादेवीमहामायेतियांभवा
न् ॥ ब्रवीतिकथमुत्पन्नासाकर्मास्याश्चकिंद्विज ॥
४५ ॥ यत्स्वभावाचसादेवीयत्स्वरूपायदुद्भवा ॥ तत्स

र्वं श्रोतुमिच्छामि त्वत्तो ब्रह्मविदांवरः ॥४६॥ ऋषिरु
वाच ॥ नित्यैव सा जगन्मूर्तिस्तया सर्वमिदं ततं ॥ त
थापि तत्समुत्पत्तिर्बहुधा श्रूयतां मम ॥४७॥ देवा
नां कार्यसिद्ध्यर्थमाविर्भवति सा यदा ॥ उत्पन्नेति
तदा लोके सा नित्याप्यभिधीयते ॥४८॥ योगनि
द्रां यदा विष्णुर्जगत्येकार्णवीकृते ॥ आस्तीर्य शेषम

उ:
३५

मभजत्कल्पांते भगवान्प्रभुः ॥४९॥ तदा द्वावसुरौ घो
रौ विख्यातौ मधुकैटभौ ॥ विष्णुकर्णमलोद्भूतौ हंतुं
ब्रह्माणमुद्यतौ ॥५०॥ स नाभिकमले विष्णोः स्थि
तो ब्रह्मा प्रजापतिः ॥ दृष्ट्वा तावसुरौ चोग्रौ प्रसुप्तं
च जनार्दनं ॥५१॥ तुष्टाव योगनिद्रां तामेकाग्रहृद
यस्थितः ॥ विबोधनार्थाय हरेर्हरिनेत्रकृतालयां

५२॥ब्रह्मोवाच॥विश्वेश्वरींजगद्धात्रींस्थितिसंहार
कारिणीं॥स्तौमिनिद्रांभगवतींविष्णोरतुलतेज
सः॥५३॥त्वंस्वाहात्वंस्वधात्वंहिवषट्कारस्वरात्मि
का॥स्वधात्वमक्षरेनित्येत्रिधामात्रात्मिकास्थिता।
५४॥अर्धमात्रास्थितानित्यायानुच्चार्याविशेषतः
त्वमेवसंध्यासावित्रीत्वंदेविजननीपरा॥५५॥त्वा

दु:
५०

यैतद्धार्यते विश्वं त्वयैतत्सृज्यते जगत ॥ त्वयैतत्पाल्य
ते देवि त्वमत्स्यंते च सर्वदा ॥ विसृष्टौ सृष्टिरूपा त्वं स्थि
तिरूपा च पालने ॥ तथा संहृतिरूपांते जगतोस्य ज
गन्मये ॥ ७७ ॥ महाविद्या महामाया महामेधा महा
स्मृतिः ॥ महामोहा च भवती महादेवी महेश्वरी ॥ ७८
प्रकृतिस्त्वं हि सर्वस्य गुणत्रयविभाविनी ॥ कालरा

त्रिर्महारात्रिर्मोहरात्रिश्चदारुणा ॥ ५९ ॥ त्वंश्रीस्त्वमी
श्वरीत्वंह्रीस्त्वंबुद्धिर्बोधलक्षणा ॥ लज्जापुष्टिस्तथा
तुष्टिस्त्वंशांतिःक्षांतिरेवच ॥ ६० ॥ खड्गिनीशूलिनीघो
रागदिनीचक्रिणीतथा ॥ शंखिनीचापिनीबाण
भुशुंडीपरिघायुधा ॥ ६१ ॥ सौम्यासौम्यतराशेषसौ
म्येभ्यस्त्वतिसुंदरी ॥ परापराणांपरमात्वमेवपर

मेश्वरी ॥ ६२ ॥ यच्च किंचित्क्वचिद्वस्तुसदसद्वाखिला
त्मिके ॥ तस्य सर्वस्य या शक्तिः सा त्वं किं स्तूयसे मया
६३ ॥ यया त्वया जगत्स्रष्टा जगत्पात्यत्ति यो जगत् ॥
सोपि निद्रावशं नीतः कस्त्वां स्तोतुमिहेश्वरः ॥ ६४ ॥
विष्णुः शरीरग्रहणमहमीशान एव च ॥ कारितास्ते
यतोतस्त्वां कः स्तोतुं शक्तिमान्भवेत् ॥ ६५ ॥ सा त्वमि

ंप्रभावैःस्वैरुदारैर्देविसंस्तुता ॥ मोहयैतौदुराधर्षा
वसुरौमधुकैटभौ ॥ ६६ ॥ प्रबोधंचजगत्स्वामीनी
यतामच्युतोलघु ॥ बोधश्चक्रियतामस्यहंतुमेतौम
हासुरौ ॥ ६७ ॥ ऋषिरुवाच ॥ एवंस्तुतातदादेवीता
मसीतत्रवेधसा ॥ विष्णोःप्रबोधनार्थायनिहंतुंम
धुकैटभौ ॥ नेत्रास्यनासिकाबाहुहृदयेभ्यस्तथोर

दु॰
४२

षः॥ निर्गम्यदर्शनेतस्थौब्रह्मणोव्यक्तजन्मनः॥६
९॥उत्तस्थौचजगन्नाथस्तयामुक्तोजनार्दनः॥ए
कार्णवेहिशयनात्ततःसददृशेचतौ॥७०॥मधु
कैटभौदुरात्मानावतिवीर्यपराक्रमौ॥ क्रोधरक्ते
क्षणावत्तुंब्रह्माणंजनितोद्यमौ॥७१॥समुत्थाय
ततस्ताभ्यांयुयुधेभगवान्हरिः॥पंचवर्षसहस्रा

नामसीतंतु सेधक

णिबाहुप्रहरणोविभुः॥७२॥तावप्यतिबलोन्म
त्तौमहामायाविमोहितौ॥उक्तवंतौवरोस्मत्तोव्रि
यतामितिकेशवं॥७३॥श्रीभगवानुवाच॥भवे
तामद्यमेतुष्टौममवध्याउभावपि॥किमन्येनव
रेणात्रएतावद्धिवृतंमया॥७४॥ऋषिरुवाच॥वं
चिताभ्यामितितदासर्वमापोमयंजगत॥विलो

उ॰
४३

क्ताभ्यांगदितोभगवान्कमलेक्षणः ॥७५॥ प्रीतौ
स्वस्तवयुद्धेनश्लाघ्यस्त्वंमृत्युरावयोः ॥ आवांज
हिनयत्रोर्वीसलिलेनपरिप्लुता ॥७६॥ ऋषिरु
वाच ॥ तथेत्युक्त्वाभगवताशंखचक्रगदाभृता
कृत्वाचक्रेणवैछिन्नेजघनेशिरसीतयोः ॥७७॥
एवमेषासमुत्पन्नाब्रह्मणासंस्तुतास्वयं ॥ प्रभा

वमस्माद्देव्यास्तवभूयः शृणुवदामिते ॥ ९९ ॥ इतिमा
र्कंडेयपुराणेसावर्णिकेमन्वंतरेदेवीमाहात्म्येम
धुकैटभवधोनामप्रथमोध्यायः ॥ १ ॥ द्वितीयच
रित्रस्य ॥ विष्णुर्ऋषिः ॥ उष्णिक्छंदः ॥ महालक्ष्मीर्दे
वता ॥ शाकंभरीशक्तिः ॥ दुर्गाबीजं ॥ वायुस्तत्वं ॥ य
जुर्वेदः स्वरूपं मूर्तिमयीमहालक्ष्मीप्रीत्यर्थेद्वितीयचरित्र

उं ४४

पाठेवाहोमेविनियोगः॥अथध्यानं॥अक्षस्रक्पर
शुंगदेषुकुलिशंपद्मंधनुःकुंडिकां॥दंडंशक्तिम
सिंचचर्मजलजंघंटांसुराभाजनं॥शूलंपाशसुद
र्शनंचदधतीहस्तैःप्रवालप्रभां॥सेवेसैरिभमर्दि
नीमिहमहालक्ष्मींसरोजस्थितां॥इतिमहालक्ष्मी
ध्यानं॥ऋषिरुवाच॥देवासुरमभूद्युद्धंपूर्णमब्द

शतंपुरा॥महिषेसुराणामधिपेदेवानांचपुरंद
रे॥१॥तत्रासुरैर्महावीर्यैर्देवसैन्यंपराजितं॥जि
त्वाचसकलान्देवानिंद्रोभून्महिषासुरः॥२॥
ततःपराजितादेवाःपद्मयोनिंप्रजापतिं॥पुर
स्कृत्यगतास्तत्रयत्रेशगरुडध्वजौ॥३॥यथावृत्तं
तयोस्तद्वन्महिषासुरचेष्टितं॥त्रिदशाःकथया

दु॰
४५

॥ देवाउचु ॥

मास्तु देवाभिर्भवविस्तरं ॥ ४ ॥ सूर्येंद्राग्न्यनिलेंदूनां ।
यमस्य वरुणस्य च ॥ अन्येषां चाधिकारान्सः स्व
यमेवाधितिष्ठति ॥ ५ ॥ स्वर्गांन्निराकृताः सर्वे ते
न देवगणा भुवि ॥ विचरंति यथा मर्त्या महिषे
णदुरात्मना ॥ ६ ॥ एतद्वः कथितं सर्वममरारि
विचेष्टितं ॥ शरणं वः प्रपन्नास्मो वधस्तस्य विधि

ष्यते ॥ ७ ॥ ऋषिरुवाच ॥ इत्थंनिशम्यदेवानांवचो
सिमधुसूदनः ॥ चकारकोपंशंभुश्चभ्रूकुटीकुटि
लाननौ ॥ ८ ॥ ततोतिकोपपूर्णस्यचक्रिणोव
दनात्ततः ॥ निश्चक्राममहत्तेजोब्रह्मणःशंक
रस्यच ॥ ९ ॥ अन्येषांचैवदेवानांशक्रादीनांश
रीरतः ॥ निर्गतंसुमहत्तेजस्तच्चैक्यंसमगच्छत:

दुं
४६

अतीवतेजसःकूटंज्वलंतमिवपर्वतं॥ददृशुस्ते
सुरास्तत्रज्वालाव्याप्तदिगंतरं॥११॥अतुलंतत्र
तत्तेजःसर्वदेवशरीरजं॥एकस्थंतदभून्नारीव्या
प्तलोकत्रयंत्विषा॥१२॥यदभूच्छांभवंतेजस्तेना
जायततन्मुखं॥याम्येनचाभवन्केशाबाहवो
विष्णुतेजसा॥१३॥सौम्येनस्तनयोर्युग्मंमध्यं

चैंद्रेणचाभवत् ॥ वारुणेनचजंघोरूनितंबस्तेज
साभुवः ॥ १४ ॥ ब्रह्मणस्तेजसापादौतदंगुल्योर्क
तेजसा ॥ वसूनांचकरांगुल्यः कौवेरेनचनासि
का ॥ १५ ॥ तस्यास्तुदंताःसंभूताःप्राजापत्येनतेज
सा ॥ नयनंत्रितयंजज्ञेतथापावकतेजसाः ॥ १६
भ्रुवौचसंध्ययोस्तेजःश्रवणावनिलस्यच ॥ श्रा

दु॰
४१

स्येषांचैवदेवानांसंभवस्तेजसांशिवा ॥ १७ ॥ ततःस
मस्तदेवानांतेजोराशिसमुद्भवां ॥ तांविलोक्यमु॰
दंप्रापुरमरामहिषार्दिताः ॥ १८ ॥ ततोदेवाददुस्त
स्यैस्वानिस्वान्यायुधानिच ॥ शूलंशूलाद्विनिःकृ॰
ष्यददौतस्यैपिनाकधृक् ॥ १९ ॥ चक्रंचदत्तवान्कृ
ष्णःसमुत्पाद्यस्वचक्रतः ॥ शंखंचवरुणःशक्तिं

ददौ तस्यै हुताशनः ॥२०॥ मारुतो दत्तवांश्चापं बा
णपूर्णे तथेषुधी ॥ वज्रमिंद्रः समुत्पाद्य कुलिशा
दमराधिपः ॥२१॥ ददौ तस्यै सहस्राक्षो घंटामैरा
वताद्गजात् ॥ कालदंडाद्यमो दंडं पाशं चांबुपति
र्ददौ ॥२२॥ प्रजापतिश्चाक्षमालां ददौ ब्रह्मा कमंड
लुं ॥ समस्तरोमकूपेषु निजरश्मीन्दिवाकरः ॥२३

दें
४८

कालश्चदत्तवान्खड्गंतस्यैचर्मचनिर्मलं ॥ क्षीरो॰
दश्चामलंहारमजरेचतथांबरे ॥ २४ ॥ चूडामणिं॰
तथादिव्यंकुंडलेकटकानिच ॥ अर्धचंद्रंतथाशु
भ्रंकेयूरान्सर्वबाहुषु ॥ २५ ॥ नूपुरौविमलौतद्व॰
द्ग्रैवेयकमनुत्तमं ॥ अंगुलीयकरत्नानिसमस्ता॰
स्वंगुलीषुच ॥ २६ ॥ विश्वकर्माददौतस्यैपरशुंचा

तिनिर्मलं ॥ अस्माण्यनेकरूपाणितथाभेद्यंचदेश

ने ॥ २७ ॥ अम्लानपंकजांमालांशिरस्सुरसिचापरं

अदददजलधिक्लिस्येपंकजंचातिशोभनं ॥ २८ ॥ हि

मवान्वाहनंसिंहंरत्नानिविविधानिच ॥ ददाव

क्षयंसुरापानपात्रंधनाधिपः ॥ २९ ॥ शेषश्चसर्व

नागेशोमहामणिविभूषितं ॥ नागहारंददौतस्यै

उ॰
४९

धत्रेयः पृथिवीमिमां ॥ ३० ॥ अन्यैरपि सुरैर्देवीभूष
णैरायुधैस्तथा ॥ सम्मानिता ननादोच्चैः साट्टहा
सं मुहुर्मुहुः ॥ ३१ ॥ तस्या नादेन घोरेण कृत्स्नमा
पूरितं नभः ॥ अमायतातिमहता प्रतिशब्दो मह
हानभूत् ॥ ३२ ॥ चुक्षुभुः सकला लोकाः समुद्रा
श्चचकंपिरे ॥ चचाल वसुधा चेलुः सकलाश्च म

दीयताः ॥ जयेति देवाश्च मुदा तामूचुः सिंहवाहि
नी ॥ ३४ ॥ तुष्टुवुर्मुनयश्चैनां भक्तिनम्रात्ममूर्तयः
दृष्ट्वा समस्तं संक्षुब्धं त्रैलोक्यममरारयः ॥ ३५ ॥ स
न्नद्धाखिलसैन्यास्ते समुत्तस्थुरुदायुधाः ॥ आः कि
मेतदिति क्रोधादाभाष्य महिषासुरः ॥ ३६ ॥ अ
भ्यधावत तं शब्दमशेषैरसुरैर्वृतः ॥ स ददर्श ततो

३. ५० देवीव्याप्तलोकत्रयंत्विषा ॥ ३७ ॥ पादाक्रांत्यानतभु
वंकिरीटोल्लिखितांबरां ॥ क्षोभिताशेषपातालां ॥
धनुर्ज्यानिस्वनेनतां ॥ ३८ ॥ दिशोभुजसहस्रेण
समंताद्व्याप्यसंस्थितां ॥ ततःप्रववृतेयुद्धंतयादे
व्यासुरद्विषां ॥ ३९ ॥ शस्त्रास्त्रैर्बहुधामुक्तैरादीपि
तदिगंतरं ॥ महिषासुरसेनानीश्चिक्षुराख्योम

हाम्बरः ॥ ५० ॥ पुष्पे चा नाम रत्नान्येश्वतरंगवलान्वि
तः ॥ रत्नानाम पुत्रेषु क्षि हृदयात्वो महाम्बरः ॥ ५१
श्रवुध्यनत्पुत्रानां च सहस्रेण महाहनुः ॥ पंचाष
ष्टिस्वनिपुत्रै रमिलो नाम महाम्बरः ॥ ५२ ॥ श्रवुना
नां गतेः पाड्डवांश्च लोकपुष्पे राले ॥ गजवाजिसह
स्रोघैरनेकैः परिवारितः ॥ ५३ ॥ हृतो रथ्यानां को

दुं
५८

ट्याचयुद्धेतस्मिन्नयुध्यत ॥ बिडालाख्योयुतानांचपं
चाशद्भिरथायुतैः ॥ ४४ ॥ युयुधेसंयुगेतत्ररथानांप
रिवारितः ॥ अन्येचतत्रायुतशोरथनागहयैर्वृताः
४५ ॥ युयुधुःसंयुगेदेव्यासहतत्रमहासुराः ॥ कोटि
कोटिसहस्रैस्तुरथानांदंतिनांतथा ॥ ४६ ॥ हया
नांचवृतोयुद्धेतत्राभून्महिषासुरः ॥ तोमरैर्भिं

डिपालैश्च शक्तिभिर्मुसलैस्तथा ॥ ४७ ॥ युयुधुः सं
युगे देव्या खड्गैः परशुपट्टिशैः ॥ केचिच्च चिक्षिपुः
शक्तीः केचित्पाशांस्तथापरे ॥ ४८ ॥ देवीं खड्गप्रहा
रैस्तु ते तां हंतुं प्रचक्रमुः ॥ सापि देवी ततस्तानि श
स्त्राण्यस्त्राणि चंडिका ॥ ४९ ॥ लीलयैव प्रचिच्छेद
निजशस्त्रास्त्रवर्षिणी ॥ अनायस्तानना देवी स्तू

उ॰ ५२

यमानस्सरषिंभिः ॥५०॥ मम्मोचासरद्देहेष्ठमसा
णमस्साणिवेस्सरी ॥ सोपिकुद्धोधुतसटोदेव्यावा
हनकेसरी ॥५१॥ ववार्देसुरसेम्येष्ठवनेष्विवऊ
तामन: ॥ निस्सासमानमवेयंस्सधुध्यमानारणें
विका ॥५२॥ तएवसघः संभूतागणेंस्थातसमहा
त्वपः ॥ ष्ठष्ठधुत्तेपरस्तुभिर्भिडिपालासिपहि

ले:॥५३॥नाशयंतोसुरगणान्देवीशक्त्युपबृंहि
ताः॥अवादयंतपटहान्गणाःशंखांस्तथापरे॥
५४॥मृदंगांश्चतथैवान्येतस्मिन्युद्धमहोत्सवे
ततोदेवीत्रिशूलेनगदयाशक्तिवृष्टिभिः॥५५॥
खड्गादिभिश्चशतशोनिजघानमहासुरान्॥पा
तयामासचैवान्यान्घंटास्वनविमोहितान्॥५६

दे॰ ५३

असुरान्भुविपाशेनबद्धाचान्यानकर्षयेत॥ के
चिद्द्विधाकृतास्तीक्ष्णैःखड्गपातैस्तथापरे॥५७
विपोथितानिपातेनगदयाभुविशेरते॥वेमुश्च
केचिद्रुधिरंमुसलेनभृशंहताः॥५८॥ केचिन्नि
पतिताभूमौभिन्नाःशूलेनवक्षसि॥ निरंतराःश
रौघेनकृताःकेचिद्रणाजिरे॥५९॥सेनानुका

तिताः पातास्त्र स्रुत्स्निद शार्दिताः ॥ केषांचिद्बाहव
श्छिन्नाश्छिन्नग्रीवास्तथापरे ॥ ६० ॥ शिरांसि पेतु
रन्येषामन्ये मध्ये विदारिताः ॥ विच्छिन्नजंघास्त्वपा
रे पेतु रु र्व्यां महासुराः ॥ ६१ ॥ एकबाह्वक्षिचरणाः
केचिद्देव्या द्विधा कृताः ॥ छिन्नेपि चान्ये शिरसि प
तिताः पुनरुत्थिताः ॥ ६२ ॥ कबंधा युयुधुर्देव्या गृ

दे॰ ५८ ह्रीतपरमायुधाः॥ ननृतुश्चापरेतत्रयुद्धेतस्मिँल्ल
यात्रिताः॥१३॥ कबंधाश्छिन्नशिरसःखड्गशक्त्यृ
ष्टिपाणयः॥ तिष्ठतिष्ठेतिभाषंतोदेवीमन्येमहा
सुराः॥१४॥ पातितैरथनागाश्वैरसुरैश्चवसुंधरा
अगम्यासाभवत्तत्रयत्राभूत्समहारणः॥१५॥ शो
णितौघामहानद्यःसद्यस्तत्रविसुस्रुवुः॥ मध्येचा

हस्रैन्यस्यवारणामहरवाजिनां ॥६६॥ त्वमेनतां
न्महासैन्यमस्हगणांतथाधिका ॥ निःस्येत्वयंयथा
वह्निस्तृणदारुमहावयं ॥६७॥ सचसिंहोमहा
नादस्फूर्जत्धुतकेसरः ॥ शरीरेभ्योमृगारीणां
मसृनिववविचिन्वति ॥६८॥ देवागणेश्वतेस्तत्रक
तेगुहंतथामहैः ॥ यथैषांतहद्दवाः पुष्पवृष्टि

दु॰
५५

मवोदिवि ॥ ६९ ॥ इतिमार्कंडेयपुराणेसावर्णिके
मन्वंतरेदेवीमाहात्म्येमहिषासुरसैन्यवधोना
मद्वितीयोध्यायः ॥ २ ॥ अथध्यानम् ॥ उद्यद्भानुस
हस्रकांतिमरुणक्षौमांशिरोमालिकांरक्तालि
प्तपयोधरांजपवटींविद्यामभीतिंवरं ॥ हस्ताब्जैर्द
धतींत्रिनेत्रविलसद्वक्त्रारविंदश्रियं ॥ देवींबद्धहि

मांशुरत्नमकुटांवंदेसमंदस्मितां॥३॥निध्यानं॥ऋ
षिरुवाच॥निहन्यमानंतत्सैन्यमवलोक्यमहासु
रः॥सेनानीश्चिक्षुरःकोपाद्ययौयोद्धुमथांबिकां
१॥सदेवींशरवर्षेणववर्षसमरेसुरः॥यथामे
रुगिरेःशृंगंतोयवर्षेणतोयदः॥२॥तस्यछित्वा
ततोदेवीलीलयैवशरोत्करान्॥जघानतुरगा

दुः
५६

णैर्यंतारं चैव वाजिनां ॥३॥ चिछेद च धनुः स
द्यो ध्वजं चातिसमुच्छ्रितं ॥ विव्याध चैनं गात्रेषु छि
न्नधन्वानमाशुगैः ॥४॥ स छिन्नधन्वा विरथो हता
श्वो हतसारथिः ॥ अभ्यधावत तां देवीं खड्गचर्म
धरोसुरः ॥५॥ सिंहमाहत्य खड्गेन तीक्ष्णधारेण
मूर्धनि ॥ आजघान भुजे सव्ये देवीमप्यतिवेगवा

न ॥ ६ ॥ तस्याः खड्गो भुजं प्राप्य पफाल नृपनंदन ॥
ततो जग्राह शूलं स कोपादरुणलोचनः ॥ ७ ॥
चिक्षेप च ततस्तत्तु भद्रकाल्यां महासुरः ॥ जाज्व
ल्यमानं तेजोभी रविबिंबमिवांबरात् ॥ ८ ॥ दृष्ट्वा
तदापतच्छूलं देवी शूलममुंचत ॥ तच्छूलं शतधा
तेन नीतं स च महासुरः ॥ ९ ॥ हते तस्मिन्महावी

मु॰ ८०

यैमद्दिषसूचस्रपतौ ॥ श्राजगामसगज्ञातृठश्राम
रस्थिटश्मार्दनः ॥१०॥ सोपिशक्किंस्रमोचायदेव्या
स्तामेविकाङ्कुतं ॥ ऊंकाराभिहूतांभूमोपानया
मासनिश्चमे ॥११॥ भग्नेशक्किंनिपतितांहुज्जा
क्रोधसमन्वितः ॥ विद्वेपचामरःशूलेबाणैस्त
दपूसाक्किनतत ॥१२॥ ततःसिंहःसमुत्पत्यगात्र
स्तात्रंतथाधिकं

ॐ भ्रां नमो स्थितः ॥ वाकृष्टेन यपुथेनेनो ह्रैं स्वा-
हा भगवत्रिलए ॥ ३ ॥ पृथ्मानैनो ननस्तौ हननस्मात्रा
गात्म ह्रीं गतो ॥ पुपुधातेति संरक्षौ प्रहारेरति-
दारुलैः ॥ ४ ॥ ननो वेगा नवम्रु त्पत्पानिपत्पचा-
मृगाधिपाग ॥ करप्रहारेलक्षि श्रामरस्पष्टय
कृहते ॥ ५ ॥ उदग्रश्वरणेदैक्या पिलमहत्नादि

उ
५८

भिर्हतः ॥ दंतमुष्टितलैश्चैव ककगालश्च निपातितः
१६ ॥ देवी क्रुद्धा गदापातैश्चूर्णयामास चोद्धतं ॥
बाष्कलं भिंडिपालेन बाणैस्ताम्रं तथांधकं ॥ १७
उग्रास्यमुग्रवीर्यं च तथैव च महाहनुं ॥ त्रिनेत्रा च
त्रिशूलेन जघान परमेश्वरी ॥ १८ ॥ बिडालस्यासि
नाकायात्पातयामास वै शिरः ॥ दुर्धरं दुर्मुखं चो

भोगैर्वैर्निर्विन्धेयमत्वयं ॥ ५९ ॥ एवं संस्तीयमानोपि तद्भवा
सैन्येमहीतलस्थः ॥ माहिषेण स्वरूपेण ग्रामग्याममा
सनान्नगणान् ॥ ६० ॥ कांश्चिन्नेद्रप्रहारेण तद्रक्तैपै
त्तथापतान् ॥ लाङ्गूलताडितांश्चान्यान् शृङ्गाभ्यां
वविदारितान् ॥ ६१ ॥ वेगेन कांश्चिदपरान्नादेनप्र
मणेनव ॥ निश्वासपवनेनान्यानन्यानयामासभू

तले॥२२॥निपात्यप्रमथानीकमभ्यधावतसोसुरः
सिंहंहंतुंमहादेव्याःकोपंचक्रेततोंबिका॥२३॥सो
सोपिकोपान्महावीर्यःखुरक्षुण्णमहीतलः॥शृं
गाभ्यांपर्वतानुच्चांश्चिक्षेपचननादच॥२४॥वेग
भ्रमणविक्षुण्णमहीतस्यव्यशीर्यत॥लांगूलेना
हतश्चाब्धिःप्लावयामाससर्वतः॥२५॥धुतशृंग

विभिन्नाश्चखंडंखंडंययुर्घनाः॥श्वासानिलास्ताः
शतशोनिपेतुर्नभसोचलाः॥२६॥इतिक्रोधसमा
ध्मातमापतंतंमहासुरं॥दृष्ट्वासाचंडिकाकोपंत
द्वधायतदाकरोत्॥२७॥साक्षिप्त्वातस्यवैपाशंतं
बबंधमहासुरं॥तत्याजमाहिषंरूपंसोपिबद्धो
महामृधे॥२८॥ततःसिंहोभवत्सद्योयावत्तस्यांबि

काशिरः॥ छिन्नतितावत्पुरुषःखड्गपाणिरदृश्यत
२९॥ ततएवाशुतद्रूपंदेवीविच्छेदसायकैः॥ तंखड्ग
चर्मणासार्धंततःसोभून्महागजः॥३०॥ करेणचम
हासिंहंतंचकर्षजगर्जच॥ कर्षतस्तुकरंदेवीखड्गे
ननिरकृन्ततः॥३१॥ ततोमहासुरोभूयोमाहिषंवपु
रास्थितः॥ तथैवक्षोभयामासत्रैलोक्यंसचराचरं

ततः क्रुद्धा जगन्माता चंडिका पानमुत्तमं ॥ पपौ पु
नः पुनश्चैव जहासारुणलोचना ॥ ३३ ॥ ननर्द चा
सुरः सोपि बलवीर्यमदोद्धतः ॥ विषाणाभ्यां च चि
क्षेप चंडिकां प्रति भूधरान् ॥ ३४ ॥ सा च तान्प्रहिता
स्तेन चूर्णयंती शरोत्करैः ॥ उवाच तं मदोद्धूतमुख
रागाकुलाक्षरं ॥ ३५ ॥ देव्युवाच ॥ गर्ज गर्ज क्षणं मू

दु॰
६१ ते

ढमधुयावत्पिवाम्यहं || मयात्वयिहतेत्रैवगर्जिष्यं
त्याशुदेवताः || ३६ || ऋषिरुवाच || एवमुक्त्वासमुत्प
त्यसारूढांमहासुरं || पादेनाक्रम्यकंठेचशूलेनैन
मताडयत् || ३७ || ततःसोपिपदाक्रांतस्तयानिज
मुखात्ततः || अर्धनिष्क्रांतएवासिद्देव्यावीर्येणसंवृ
तः || ३८ || अर्धनिष्क्रांतएवासौयुध्यमानोमहासुर

रः॥ तयामहासिनादेव्याशिरश्छित्वानिपातितः॥
३९॥ ततोहाहाकृतंसर्वंदैत्यसैन्यंननाशयत॥ प्रह
र्षंचपरंजग्मुःसकलादेवतागणाः॥४०॥ तुष्टुवुस्तां
सुरादेवींसहदिव्यैर्महर्षिभिः॥ जगुर्गंधर्वपतयो
ननृतुश्चाप्सरोगणाः॥४१॥ इतिश्रीमार्कंडेयपुराणे
सावर्णिकेमन्वंतरेदेवीमाहात्म्येमहिषासुरव

दुं. ६२

धोनामतृतीयोध्यायः ॥३॥ अथध्यानं ॥ काला
भ्राभ्रंकटाक्षैररिकुलभयदांमौलिबद्धेंदुरेखां
शंखंचक्रंकृपाणींत्रिशिखमपिकरैरुद्वहंतीं
त्रिनेत्रां ॥ सिंहस्कंधाधिरूढांत्रिभुवनमखिलंते
जसापूरयंतींध्यायेद्दुर्गांजयाख्यांत्रिदशपरिवृ
तांसेवितांसिद्धिकामैः ॥ इति ध्यानम् ॥ अथकि

वाच॥ ततः सुरगणाः सर्वे देव्या इंद्रपुरोगमाः॥ स्तु
तिमारेभिरे कर्तुं निहते महिषासुरे॥१॥ शक्रादा
यः सुरगणा निहतेतिवीर्ये तस्मिन्दुरात्मनि सुरा
रिबले च देव्या॥ तां तुष्टुवुः प्रणतिनम्रशिरोध
रांसा वाग्भिः प्रहर्षपुलकोद्गमचारुदेहा॥२॥ देवा
ऊचुः॥ देव्या यया ततमिदं जगदात्मशक्त्या निःशेष

दे
६३

देवगणशक्तिसमूहमूर्त्या॥तामंबिकामखिलदेव
महर्षिपूज्यांभक्त्यानताःस्मविदधातुशुभानिसानः
२॥यस्याःप्रभावमतुलंभगवाननंतोब्रह्माहरश्च
नहिवक्तुमलंबलंच॥साचंडिकाखिलजगत्प
रिपालनायनाशायचाशुभभयस्यमतिंकरोतु॥
३॥याश्रीःस्वयंसुकृतिनांभवनेष्वलक्ष्मीःपापात्म

नोकृतधियांहृदयेषुबुद्धिः॥ब्रह्मामृतांउलजन्
प्रभवस्यलज्जातोत्वोनतास्मपरिपालयदेवविश्व
४॥किंवर्णयामितवरूपमचिंत्यमेतत्किंचातिवी
र्यमसह्यरुपकारिभूरि॥किंवाद्भुतेषुचरितानित
वाद्भुतानिसर्वेषुदेव्यसुरदेवगणादिकेषु॥५॥
हेतुःसमस्तजगतोत्रिगुणापिदोषैर्नज्ञायसेद्व

दुं॰
६४

रिहरादिभिरप्यपारा ॥ सर्वाश्रयाखिलमिदं जग-
दंशभूतमव्याकृता हि परमा प्रकृतिस्त्वमाद्या ॥ ६
यस्याः समस्तसुरता समुदीरणेन तृप्तिं प्रयाति-
सकलेषु मखेषु देवि ॥ स्वाहासि वै पितृगणस्य च
तृप्तिहेतुरुच्चार्यसे त्वत एव जनैः स्वधा च ॥ ७ ॥
या मुक्तिहेतुरविचिंत्यमहाव्रता च समभ्यस्यसे सु-

नियतेंद्रियतत्वसारैः ॥ मोक्षार्थिभिर्मुनिभिरस्त
समस्तदोषैर्विद्यासि सा भगवती परमा हि देवी ॥ ८
शब्दात्मिका सुविमलर्ग्यजुषां निधानमुद्गीथर
म्यपदपाठवतां च साम्नां ॥ देवी त्रयी भगवती भ
वभावनाय वार्त्ता च सर्वजगतां परमार्तिहंत्री ॥ ९
मेधासि देवि विदिताखिलशास्त्रसारा दुर्गासि दु

र्गभवसागरनौरसंगा॥ श्रीःकैटभारिहृदयैक
कृताधिवासागौरित्वमेवशशिमौलिकृतप्रति
ष्ठा॥१०॥ ईषत्सहासममलंपरिपूर्णचंद्रबिंबानु
कारिकनकोत्तमकांतिकांतं॥ अत्यद्भुतंप्रहृतमा
त्तरुषातथापिवक्त्रंविलोक्यसहसामहिषासु
रेण॥११॥ दृष्ट्वातदेविकुपितंभ्रुकुटीकरालमुद्य

कोपंकमलदृगाङ्कविपन्नसद्यः॥ प्राणान्मुमोचम
हिषस्तदतीवचित्रंकैर्जीव्यतेहिकुपितांतकदर्श
नेन॥१४॥देविप्रसीदपरमाभवतीभवायसद्यो
विनाशयसिकोपवतीकुलानि॥ विज्ञातमेतद
धुनैवयदस्तमेतन्नीतंबलंसुविपुलंमहिषासुर
स्य॥१५॥तेसंमताजनपदेषुधनानितेषां

उ. यशांसिनचसीदतिबंधुवर्गः॥धन्यास्तएवनिभृ
६६ तात्मजभृत्यदारायेषांसदाभ्युदयदाभवतीप्रस
न्ना॥१४॥धर्म्याणिदेविसकलानिसदैवकर्माण्य
त्यादृतःप्रतिदिनंसुकृतीकरोति॥स्वर्गंप्रयातिच
ततोभवतीप्रसादाल्लोकत्रयेपिफलदाननुदे
वितेन॥१५॥दुर्गेस्मृताहरसिभीतिमशेषजंतो

ःस्त्वस्थैस्त्वत्तामतिमतोवशुभांस्टदास्मि ॥ दारिद्र्यदुः
खभयहारिणिकात्वदन्यासर्वोपकारकरणाय
सदार्द्रचित्ता ॥१६॥ एतैर्हेतैर्जगद्दुपैतिसर्वंतव्ये
तेकुर्वतेननामनरकायविनाशपापं ॥ संग्रामसं
त्वमधिगम्यदिवंप्रयांतिमन्वेतितून्नमहितान्वि
निहंसिदेवि ॥१७॥ हृह्रैवकिंनभवतीप्रकरोति॥

हे ६७

भस्मसर्वांम्बरानरिभुवनत्रहिमोषिनाम्त्रं ॥ लोका
न्यपातरिपवोपिद्दिमाम्रहस्ताइत्थंमतिर्भवतिते
श्वहितेश्वस्माधी ॥ १८ ॥ त्वद्रप्रभानिकरविस्फुरणे
स्तस्तोद्यैः स्फुलायकांतिनिवहेनहृद्भोम्बराणां ॥
यत्रागताविलयमंत्रमदिंदुसंवद्रघोमणाननंतवा
विलोकयतांनदेतत ॥ १९ ॥ उर्हनहृनमामनंतव

देविशीलंरूपंतथैतदविचिंत्यमतुल्यमन्यैः॥वीर्यं।
चहंतृहृतदेवपराक्रमाणांवैरिष्वपिप्रकटितैवद
यात्वयेत्थं॥२०॥केनोपमाभवतितेस्यपराक्रमस्य
रूपंचशत्रुभयकार्यतिहारिकुत्र॥चित्तेकृपासम
रनिष्ठुरताचदृष्टात्वय्येवदेविवरदेभुवनत्रयेपि
२१॥त्रैलोक्यमेतदखिलंरिपुनाशनेनत्रातंत्वया

दु॰ ६८

समरमूर्धनितेपिहत्वा॥ नीतादिवंरिपुगणाभय
मप्यपास्तमस्माकमुन्मदसुरारिभवंनमस्ते॥ २२
शूलेनपाहिनोदेविपाहिखड्गेनचांबिके॥ घंटा
स्वनेननःपाहिचापज्यानिःस्वनेनच॥ २३॥ प्रा
च्यांरक्षप्रतीच्यांचचंडिकेरक्षदक्षिणे॥ भ्रामणे
नात्मशूलस्यउत्तरस्यांतथेश्वरि॥ २४॥ सौम्या

नियानिरूपाणित्रैलोकेविचरंतिते॥यानिचा
त्यंतघोराणितैरक्षास्मांस्तथाभुवं॥२५॥खड्गशू
लगदादीनियानिचास्त्राणितेंबिके॥करपल्ल
वसंगीनितैरस्मान्रक्षसर्वतः॥२६॥ऋषिरुवाच
एवंस्तुतासुरैर्दिव्यैःकुसुमैर्नंदनोद्भवैः॥अर्चिता
जगतांधात्रीतथागंधानुलेपनैः॥२७॥भक्त्यासम

दु॰
६९

लैस्त्रिदशैर्दिव्यैर्धूपैस्तुधूपिता॥ प्राहप्रसादसुमुखी
समस्तान्प्रणतान्सुरान्॥२८॥ व्रियतांत्रिदशाःस
र्वंयदस्मत्तोभिवांछितं॥ ददाम्यहमतिप्रीत्यास्त
वैरेभिःसुपूजिता॥२९॥ देवा ऊचुः॥ भगवत्याकृ
तंसर्वंनकिंचिदवशिष्यते॥ यदयंनिहतःशत्रु
रस्माकंमहिषासुरः॥३०॥ यदिवापिवरोदेयस्त्वया

यास्माकंमहेश्वरि॥संस्मृतासंस्मृतात्वंनोहिंसे
थाःपरमापदः॥३४॥यच्चमर्त्यस्तवैरेभिःस्त्वांस्तो
ष्यत्यमलानने॥तस्यवित्तर्द्धिविभवैर्धनदारादि
संपदां॥३५॥वृद्धयेस्मत्प्रसन्नात्वंभवेथाःसर्वदांबि
के॥ऋषिरुवाच॥इतिप्रसादितादेवैर्जगतोर्थे
तथात्मनः॥तथेत्युक्त्वाभद्रकालीबभूवांतर्हिता

७१

नृप ॥ इत्येतत्कथितं भूप संभूता सा यथा पुरा ॥ ३४
देवी देवशरीरेभ्यो जगत्त्रयहितैषिणी ॥ पुनश्च गौ
रीदेहात्सा समुद्भूता यथाभवत् ॥ ३५ ॥ वधाय दुष्ट
दैत्यानां तथा शुंभनिशुंभयोः ॥ रक्षणाय च लोका
नां देवानामुपकारिणी ॥ तच्छृणुष्व मयाख्यातं य
थावत्कथयामि ते ॥ ३६ ॥ इति श्रीमार्कंडेयपुराणे सा

वर्णिके मन्वंतरे देवीमाहात्म्ये शक्रादिस्तुतिर्ना
म चतुर्थोध्यायः ॥४॥ ऋषि ध्यानं ॥ सौवर्णांबुज
मध्यगां त्रिनयनां सौदामिनीसन्निभां ॥ शंखं चा
क्रवराभयानि दधतीमिंदोः कलां बिभ्रतीं ॥ ग्रैवे
यांगदहारकुंडलधरां माखंडलाद्यैः स्तुतां ॥ ध्याये
द्विंध्यनिवासिनीं शशिमुखीं पार्श्वस्थपंचाननां

दु॰
७१

इतिध्यानम्॥ऋषिरुवाच॥पुराशुंभनिशुंभाभ्या
मसुराभ्यांशचीपतेः॥त्रैलोक्यंयज्ञभागाश्चहृता
मदवलाश्रयात॥१॥तावेवसूर्यतांतद्वदधिका
रंतथैंदवं॥कौवेरमथयाम्यंचचक्रातेवरुणस्य
च॥२॥तावेवपवनर्द्धिंचचक्रतुर्वह्निकर्मच॥
ततोदेवाविनिर्धूताभ्रष्टराज्याःपराजिताः॥३॥

हृताधिकारास्त्रिदशास्ताभ्यांसर्वेनिराकृताः॥म
हासुराभ्यांतांदेवींसंस्मरंत्यपराजितां॥४॥तया
स्माकंवरोदत्तोयथापत्सुस्मृताखिलाः॥भवतां
नाशयिष्यामितत्क्षणात्परमापदः॥५॥इतिकृ
त्वामतिंदेवाहिमवंतंनगेश्वरं॥जग्मुस्तत्रततो
देवींविष्णुमायांप्रतुष्टुवुः॥६॥देवाऊचुः॥नमो

दुं
७२

देव्यैमहादेव्यैशिवायैसततंनमः॥ नमःप्रकृत्यै
भद्रायैनियताःप्रणताःस्मतां॥७॥रौद्रायैनमो
नित्यायैगौर्यैधात्र्यैनमोनमः॥ज्योत्स्नायैचेंदुरू
पायैसुखायैसततंनमः॥८॥कल्याण्यैप्रणतां
वृद्ध्यैसिद्ध्यैकुर्म्मोनमोनमः॥नैरृत्यैभूभृतांलक्ष्म्यै
शर्वाण्यैतेनमोनमः॥९॥दुर्गायैदुर्गपारायैसा

ण्यै सर्वकारिण्यै ॥ ख्यात्यै तथैव कृष्णायै धूम्रायै स
ततं नमः ॥ १० ॥ अतिसौम्यातिरौद्रायै नतास्तस्यै
नमो नमः ॥ नमो जगत्प्रतिष्ठायै देव्यै कृत्यै नमो
नमः ॥ ११ ॥ या देवी सर्वभूतेषु विष्णुमायेति शब्दि
ता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ १२
या देवी सर्वभूतेषु चेतनेत्यभिधीयते ॥ नमस्तस्यै

दु॰
७३

नमस्तस्यैनमस्तस्यैनमोनमः॥१३॥यादेवीसर्वा
भूतेषुबुद्धिरूपेणसंस्थिता॥नमस्तस्यैनमस्तस्यै
नमस्तस्यैनमोनमः॥१४॥यादेवी॥निद्रारूपे॥
नमस्तस्यै॥१५॥यादेवी॥क्षुधारूपे॥नमस्तस्यै॥
१६॥यादेवी॥छायारूपे॥नमस्तस्यै॥१७॥यादेवी
शक्तिरूपे॥नमस्तस्यै॥१८॥यादेवी॥तृष्णारूपे

नमस्तस्यै ॥ १९ ॥ यादेवी ॥ क्षांतिरूपे ॥ नमस्तस्यै
२० ॥ यादेवी ॥ जातिरूपे ॥ नमस्तस्यै ॥ २१ ॥ यादे-
वी ॥ लज्जारूपे ॥ नमस्तस्यै ॥ २२ ॥ यादेवी ॥ शांति
रूपे ॥ नमस्तस्यै ॥ २३ ॥ यादेवी ॥ श्रद्धारूपे ॥ नम
स्तस्यै ॥ २४ ॥ यादेवी ॥ कांतिरूपे ॥ नमस्तस्यै ॥ २५
यादेवी ॥ लक्ष्मीरूपे ॥ नमस्तस्यै ॥ २६ ॥ यादेवी-

दु॰
७४

क्षांतिरूपे॥ नमस्तस्यै॥ २७॥ यादेवी॥ स्मृतिरूपे॥ न
मस्तस्यै॥ २८॥ यादेवी॥ दयारूपे॥ नमस्तस्यै॥ २९॥
यादेवी॥ तुष्टिरूपे॥ नमस्तस्यै॥ ३०॥ यादेवी॥ मा
तृरूपे॥ नमस्तस्यै॥ ३१॥ यादेवी॥ भ्रांतिरूपेण।
संस्थिता॥ नमस्तस्यै॥ ३२॥ इंद्रियाणामधिष्ठा
त्रीभूतानामखिलेषुया॥ भूतेषुसततंतस्यैव्या

स्यैदेस्यैनमोनमः ॥३३॥ चितिरूपेण या कृत्स्नमे
तद्व्याप्य स्थिता जगत् ॥ नमस्तस्यै॰ ॥३४॥ स्तुता
सुरैः पूर्वमभीष्टसंश्रयात्तथा सुरेंद्रेण दिनेषु से
विता ॥ करोतु सा नः शुभहेतुरीश्वरी शुभानि भ
द्राण्यभिहंतु चापदः ॥३५॥ या सांप्रतं चोद्धतदै
त्यतापितैरस्माभिरीशा च सुरैर्नमस्यते ॥ या च स्म

ता तत्क्षणमेव हंति नः सर्वापदो भक्तिविनम्रमूर्त्ति
भिः ॥ ३६ ॥ ऋषिरुवाच ॥ एवं स्तवादियुक्तानां देवा
नां तत्र पार्वती ॥ स्नातुमभ्याययौ तोये जाह्नव्या नृप
नंदन ॥ ३७ ॥ साब्रवीत्तान्सुरान्सुभ्रूर्भवद्भिः स्तूयतेऽत्र
का ॥ शरीरकोशतश्चास्याः समुद्भूताब्रवीच्छिवा
३८ ॥ स्तोत्रं ममैतत्क्रियते शुंभदैत्यनिराकृतैः ॥ देवै

समस्तैसमरेनिसुंभेनपराजितैः॥३९॥ शरीरको-
शाद्यतस्याः पार्वत्यानिःसृतांबिका॥ कौशिकीति
समस्तेषुततोलोकेषुगीयते॥४०॥ तस्यांविनिर्ग-
तायांतुकृष्णाभूत्सापिपार्वती॥ कालिकेतिसमा-
ख्याताहिमाचलकृताश्रया॥४१॥ ततोंबिकांपरं
रूपंबिभ्राणांसुमनोहरं॥ ददर्शचंडोमुंडश्चभृत्यो

दु॰ शुंभनिशुंभयोः ॥४२॥ ताभ्यां शुंभाय चाख्याता सा
७६ तीव सुमनोहरा ॥ काप्यास्ते स्त्री महाराज भासयं
ती हिमाचलं ॥४३॥ नैव तादृक्क्वचिद्रूपं दृष्टं केना
चिदुत्तमं ॥ ज्ञायतां काप्यसौ देवी गृह्यतां चासुरे
श्वर ॥४४॥ स्त्रीरत्नमतिचार्वंगी द्योतयंती दिशः
त्विषा ॥ सा तु तिष्ठति दैत्येंद्र तां भवान्द्रष्टुमर्हति

४५ ॥ यानिरत्नानिमणयोगजाश्वादीनिवैप्रभो ॥
त्रैलोक्येतुसमस्तानिसांप्रतंभांतितेगृहे ॥ ४६ ॥
ऐरावतःसमानीतोगजरत्नंपुरंदरात् ॥ पारिजा
ततरुश्चायंतथैवोच्चैःश्रवाहयः ॥ ४७ ॥ विमानंहं
ससंयुक्तमेतत्तिष्ठतितेंगणे ॥ रत्नभूतमिहानीतं
यदासीद्वेधसोद्भुतं ॥ ४८ ॥ निधिरेषमहापद्मस

दे॰
११

मानीतोधनेश्वरात् ॥ किंजल्किनींददौचाब्धिर्मा
लामम्लानपंकजां ॥ ४९ ॥ छत्रंतेवारुणंगेहेकांच
नस्रावितिष्ठति ॥ तथायंस्यंदनवरोयःपुरासीत्प्र
जापतेः ॥ ५० ॥ मृत्योरुत्क्रांतिदानामशक्तिरीशत्व
याहृता ॥ पाशःसलिलराजस्यभ्रातुस्तवपरिग
हे ॥ ५१ ॥ निशुंभस्याब्धिजाताश्चसमस्तारत्नजात ।

यः॥ वह्निरपिददौतुभ्यमग्निशौचेचवाससी॥५२॥
एवंदैत्येंद्ररत्नानिसमस्तान्याहृतानिते॥ स्त्रीरत्न
मेषाकल्याणीत्वयाकस्मान्नगृह्यते॥५३॥ ऋषिरु
वाच॥ निशम्येतिवचःशुंभःसतदाचंडमुंडयोः॥
प्रेषयामाससुग्रीवंदूतंदेव्यामहासुरः॥५४॥ इति
चेतिचवक्तव्यासागत्वावचनान्मम॥ यथाचास्ये

उ॰
७८

तिमं प्रीत्या तथा कार्यं त्वया लघु ॥५५॥ स्नात्वा गत्वा
यत्रास्ते शैलो देशे तिष्ठो भवे ॥ नां च देवी नतः प्रा
हस्लत्त्वां मधुरया गिरा ॥५६॥ हनउवाच ॥ देवि
दैत्येश्वरः संभस्त्रैलोक्यपरमेश्वरः ॥ इतोहं प्रेषि
तस्तेन त्वत्सकाशमिहागतः ॥५७॥ ब्रह्माद्यता
त्तः सर्वास्तयः सदा देवयोनिभ ॥ निर्जिताखिल

दैत्यारिः स यदाह शृणुष्व तत् ॥५८॥ मम त्रैलो
क्यमखिलं मम देवा वशानुगाः ॥ यज्ञभागान
हं सर्वानुपाश्नामि पृथक्पृथक् ॥५९॥ त्रैलोक्येव
ररत्नानि मम वश्यान्यशेषतः ॥ तथैव गजरत्नं
च हृत्वा देवेन्द्रवाहनं ॥६०॥ क्षीरोदमथनोद्भूतमश्व
रत्नं ममामरैः ॥ उच्चैःश्रवससंज्ञं तत्प्रणिपत्य

समर्पितं ॥९१॥ यानि चान्यानि देवेषु गंधर्वेषूरगे
षु च ॥ रत्नभूतानि भूतानि तानि मय्येव शोभने
९२ ॥ स्त्रीरत्नभूतां त्वां देवि लोके मन्यामहे वयं ॥
सा त्वमस्मानुपागच्छ यतो रत्नभुजो वयं ॥९३॥ मां
वा ममानुजं वापि निशुंभमुरुविक्रमं ॥ भजत्वं चं
चलापांगि रत्नभूतासि वै यतः ॥९४॥ परमैश्वर्य

मतुलें प्राप्स्यसे मत्परिग्रहात॥ एतद्बुध्वा समा
लोच्य मत्परिग्रहतां ब्रज॥६५॥ ऋषिरुवाच॥ इ
त्युक्ता सा तदा देवी गंभीरांतःस्मिता जगौ॥ दु
र्गा भगवती भद्रा ययेदं धार्यते जगत॥६६॥ दे
व्युवाच॥ सत्यमुक्तं त्वया नात्र मिथ्या किंचित्त्वयो
दितं॥ त्रैलोक्याधिपतिः शुंभो निशुंभश्चापि ता

दु.
७०

दृशः॥६७॥ किंतत्रयत्प्रतिज्ञातंमिथ्यातत्क्रियते
कथं॥ श्रूयतामल्पबुद्धित्वात्प्रतिज्ञायापुराकृ
ता॥६८॥ योमांजयतिसंग्रामेयोमेदर्पंव्यपो
हति॥ योमेप्रतिबलोलोकेसमेभर्ताभविष्य
ति॥६९॥ तदागच्छतुशुंभोत्रनिशुंभोवामहासु
रः॥ मांजित्वाकिंचिरेणात्रपाणिंगृह्णातुमेल

घुः॥१९॥ दूतउवाच॥ अवलिप्तासिमैवंत्वंदेविब्रू
हिममाग्रतः॥ त्रैलोक्येकःपुमांस्तिष्टेदग्रेशुंभ
निशुंभयोः॥२०॥ अन्येषामपिदैत्यानांसर्वेदेवा
नवैयुधि॥ तिष्टंतिसन्मुखेदेविकिंपुनस्त्रीत्वमे
किका॥२१॥ इंद्राद्याःसकलादेवास्तस्थुर्येषांन
संयुगे॥ शुंभादीनांकथंतेषांस्त्रीप्रयास्यसिसं

दुं सुते ॥७३॥ सा त्वं गछ मयैवोक्ता पार्श्वं सुंभनिसुंभ
८१ योः ॥ केशाकर्षणनिर्धूतगौरवा मा गमिष्यसि
७४ ॥ देव्युवाच ॥ एवमेतद्बली शुंभो निशुंभश्चाति
वीर्यवान् ॥ किं करोमि प्रतिज्ञा मे यदनालोचि
तापुरा ॥७५॥ स त्वं गछ मयैवोक्तं यदेतत्सर्वमा
दृतः ॥ तदाचक्ष्वासुरेंद्राय स च युक्तं करोतु तत्
गा

१६ ॥ इति मार्कंडेयपुराणे सावर्णिके मन्वंतरे देवी
माहात्म्ये दूतसंवादो नाम पंचमोध्यायः ॥५॥ तृ
तीयचरित्रस्य रुद्र ऋषिः ॥ अनुष्टुप्छंदः ॥ श्रीमहा
सरस्वती देवता ॥ भीमा शक्तिः ॥ भ्रामरी बीजं ॥ सू
र्यस्तत्वं ॥ सामवेदमूर्तिमयी महासरस्वती प्रीत्य
र्थं तृतीयचरित्रपाठे होमे विनियोगः ॥ अथ ध्यानं

उं. ८२

घंटाशूलहलानिशंखमुसलेचक्रंधनुःसायकं ॥
हस्ताब्जैर्दधतींघनांतविलसच्छीतांशुतुल्यप्रभां
गौरीदेहसमुद्भवांत्रिजगतामाधारभूतांमहा ॥
पूर्वामत्रसरस्वतीमनुभजेशुंभादिदैत्यार्दिनीं ॥
इतिमहासरस्वतीध्यानं ॥ ऋषिरुवाच ॥ इत्याक
र्ण्यवचोदेव्याःसदूतोमर्षपूरितः ॥ समाचष्टसमा

गम्यदैत्यराजायविस्तरात॥ १ ॥तस्यदूतस्यतद्वाक्य
माकर्ण्यासुरराट्ततः॥सक्रोधःप्राहदैत्यानामधि
पंधूम्रलोचनं॥ २ ॥हेधूम्रलोचनाशुत्वंस्वसैन्य
परिवारितः॥तामानयबलाद्दुष्टांकेशाकर्षण
विह्वलां॥ ३ ॥तत्परित्राणदःकश्चिद्यदिवोत्तिष्ठ
तेऽपरः॥सहन्तव्योऽमरोवापियक्षोगंधर्वएववा॥ ४

दुं
८३

ऋषिरुवाच॥तेनाज्ञप्तस्ततःशीघ्रंसदैत्योधूम्रलो
चनः॥वृतःषष्ट्यासहस्राणामसुराणांद्रुतंययौ॥
५॥सदृष्ट्वातांततोदेवींतुहिनाचलसंस्थितां॥ज
गादोच्चैःप्रयाहीतिमूलंशुंभनिशुंभयोः॥६॥न
चेत्प्रीत्याद्यभवतीमद्भर्तारमुपैष्यति॥ततोबला
न्नयाम्येषकेशाकर्षणविह्वलां॥७॥देव्युवाच॥

दैत्येश्वरेणप्रहितोबलवान्बलसंवृतः॥बलान्नय
सिमामेवंततःकिंतेकरोम्यहं॥८॥ऋषिरुवाच॥
इत्युक्तःसोऽभ्यधावत्तामसुरोधूम्रलोचनः॥हुंका
रेणैवतंभस्मसाचकाराम्बिकाततः॥९॥अथक्रु
द्धंमहासैन्यमसुराणांतथाम्बिका॥ववर्षसाय
कैस्तीक्ष्णैस्तथाशक्तिपरश्वधैः॥१०॥ततोधुतसा

उ॰
२४

टः कोपात्कृत्वा नादं स्म भैरवं ॥ पपातनास्मरमेनायं
सिंहो देव्यास्तवाहनः ॥ ११ ॥ कोश्चिन्नरप्रहारेण
दैन्यानानास्येनचापपात ॥ आक्रम्यचाधवेणानन्या
नजघानचमहासुरान् ॥ १२ ॥ केचिंचित्पाटया
मासनवैः कोश्चानिकेसरी ॥ तथानलप्रहारे
ण शिरांसिकृतवान्पृथक् ॥ १३ ॥ विकिन्नवाऊ

शिरस्सःकृतास्तेनतयापरे॥पपौचरुधिरंकोष्टाद्
न्येषांधुतकेसरः॥१४॥क्षणेनतद्बलंसर्वंक्षयंनी
तंमहात्मना॥तेनकेसरिणादेव्यावाहनेनाति
कोपिना॥१५॥श्रुत्वातमसुरंदेव्यानिहतंधूम्र
लोचनं॥बलंचक्षयितंकृत्स्नंदेवीकेसरिणात
तः॥१६॥चुकोपदैत्याधिपतिःशुंभःप्रस्फुरिता

उः
८५

धरः ॥ आज्ञापयामास चतौ चंडमुंडौ महासुरौ ॥ १७
हे चंड हे मुंड बलैर्बहुभिः परिवारितौ ॥ तत्र गच्छ-
त गत्वा च समानीयतां लघु ॥ १८ ॥ केशेषाकृ-
ष्य बद्ध्वा वा यदि वः संशयो युधि ॥ तदाशेषायुधैः
सर्वैरसुरैर्विनिहन्यतां ॥ १९ ॥ तस्यां हतायां दुष्टा-
यां सिंहे च विनिपातिते ॥ शीघ्रमागम्यतां ब-

द्ध्वा गृहीत्वा तामथांबिकां ॥२०॥ इति मार्कंडेय
पुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये धूम्र
लोचनवधो नाम षष्ठोध्यायः ॥६॥ अथ ध्या
नं ॥ नागाधीश्वरविष्टरां फणिफणोत्तंसोरुरत्ना
वलीभास्वद्देहलतां विभाकरनिभां नेत्रत्रयोद्भा
सितां ॥ मालाकुंभकपालिनीरजकरां चंद्रार्धमौ

सु. ८६

लिंपरांसर्वज्ञेश्वरभैरवांकनिलयांपद्मावतींचिंत
येत ॥ इति ध्याने ॥ ऋषिरुवाच ॥ आज्ञप्तास्तेत
तोदैत्याश्चंडमुंडपुरोगमाः ॥ चतुरंगबलोपेता
ययुरभ्युद्यतायुधाः ॥ १ ॥ ददृशुस्तेततोदेवीमीषद्धा
सांव्यवस्थितां ॥ सिंहस्योपरिशैलेंद्रशृंगेमहति
कांचने ॥ २ ॥ तेदृष्ट्वातांसमादातुमुद्यमंचक्रुरु

शना॥आकृष्यचापासिधरास्तथान्येतत्समीपा-
गाः॥३॥ततःकोपंचकारोच्चैरंबिकातानरीन्प्र-
ति॥कोपेनचास्यावदनंमषीवर्णमभूत्तदा॥४
भ्रुकुटीकुटिलात्तस्याललाटफलकाद्द्रुतं॥का-
लीकरालवदनाविनिःक्रांतासिपाशिनी॥५॥
विचित्रखट्वांगधरानरमालाविभूषणा॥द्वी-

दुं ८७

पिचर्मपरीधानाशुष्कमांसातिभैरवी ॥६॥ अति
विस्तारवदनाजिह्वाललनभीषणा ॥ निमः
ग्नारक्तनयनानादापूरितदिङ्मुखा ॥७॥ सावे
गेनाभिपतिताघातयंतीमहासुरान् ॥ सैन्येः
तत्रसुरारीणामभक्षयततद्बलं ॥८॥ पार्ष्णिग्रा
हांकुशग्राहीयोधघंटासमन्वितान् ॥ समादा

यैकहस्तेनमुखेचिक्षेपवारणान् ॥ ९ ॥ तथैवा
योधंतुरगैरथंसारथिनासह ॥ निक्षिप्यवक्त्रेद
शनैश्चर्वयंत्यतिभैरवं ॥ १० ॥ एकंजग्राहकेशेषु
ग्रीवायामथचापरं ॥ पादेनाक्रम्यचैवान्यमु
रसान्यमपोथयत् ॥ ११ ॥ तैर्मुक्तानिचशस्त्राणि
महास्त्राणितथासुरैः ॥ मुखेनजग्राहरुषादश

दु.
८८

नैर्मथितान्यपि ॥१२॥ बलिनां तद्बलं सर्वमसुराणां
दुरात्मनां ॥ ममर्दाभक्षयच्चान्यानन्यांश्चाताडयत्त
था ॥१३॥ असिना निहताः केचित्केचित्खट्वांगता
डिताः ॥ जग्मुर्विनाशमसुरा दंताग्राभिहतास्त
था ॥१४॥ क्षणेन तद्बलं सर्वमसुराणां निपाति
तं ॥ दृष्ट्वा चंडोभिदुद्राव तां कालीमतिभीषणां

१५ ॥ शरवर्षैर्महाभीमैर्भीमाक्षीतां महासुरः ॥ छा
दयामास चक्रैश्च मुंडक्षिप्तैः सहस्रशः ॥ १६ ॥ तानि
चक्राण्यनेकानि विशमानानि तन्मुखं ॥ बभुर्य
थार्कबिंबानि सुबहूनि घनोदरं ॥ १७ ॥ ततो जहा
सातिरुषा भीमं भैरवनादिनी ॥ कालीकरालव
क्रांतर्दुर्दर्शदशनोज्ज्वला ॥ १८ ॥ उत्थाय च महासिं

दु॰
८९

हृदेवीचंडमथावत ॥ गृहीत्वा चास्य केशेषु शिरस्ते
नासिनाछिनत ॥ १९ ॥ अथ मुंडोभ्यधावत्तां दृष्ट्वा चं
डं निपातितं ॥ तमप्यपातयद्भूमौ सा खड्गाभिहतं
रुषा ॥ २० ॥ हतशेषं ततः सैन्यं दृष्ट्वा चंडं निपातितं
मुंडं च सुमहावीर्यं दिशो भेजे भयातुरं ॥ २१ ॥ शिर
श्चंडस्य काली च गृहीत्वा मुंडमेव च ॥ प्राह प्रचंडा

ट्टहासमिश्रमभ्येत्यचंडिकां ॥२२॥ मयातवात्रोप
हृतौचंडमुंडौमहापशू ॥ युद्धयज्ञेस्वयंशुंभंनिशुं
भंचहनिष्यसि ॥२३॥ ऋषिरुवाच ॥ तावानीतौत
तोदृष्ट्वाचंडमुंडौमहासुरौ ॥ उवाचकालींकल्या
णीललितंचंडिकावचः ॥२४॥ यस्माच्चंडंचमुंडं
चगृहीत्वात्वमुपागता ॥ चामुंडेतिततोलोकेख्या

दु॰
९०

नादेविभविष्यसि॥२५॥इतिमार्कंडेयपुराणेसा
वर्णिकेमन्वंतरेदेवीमाहात्म्येचंडमंडवधोना
मसप्तमोध्यायः॥७॥अथध्यानं॥अरुणांकरुणा
तरंगितांगींधृतपाशांकुशपुष्पबाणचापान्॥अ
णिमादिभिरावृतांमयूखैरहमित्येवविभावयेभ
वानीं॥इतिध्यानं॥ऋषिरुवाच॥चंडेचनिहते॥

दैत्येमुंडेचविनिपातिते ॥ बहुलेषुचसैन्येषुक्षपि
तेष्वसुरेश्वरः ॥ १ ॥ ततःकोपपराधीनचेताःशुंभः
प्रतापवान् ॥ उद्योगंसर्वसैन्यानांदैत्यानामादिदे
शह ॥ २ ॥ अद्यसर्वबलैर्दैत्याःषडशीतिरुदायुधाः
कंबूनांचतुरशीतिर्निर्यांतुस्वबलैर्वृताः ॥ ३ ॥
कोटिवीर्याणिपंचाशदसुराणांकुलानिवै ॥ श

उ
८१

नेऽकुला निध्वस्वाणां निर्गच्छंतु समाज्ञया ॥४॥ का
लिकादैत्यहंतामेयोः कालिकेपाल्लयाह्नवः ॥७
ह्रायमज्ञानिर्योतस्रास्त्रयान्वरिनामम ॥५॥ इ
त्याज्ञाप्यान्स्रपतिः शुंभोभैरवध्वानसन्नः ॥ निर्जो
गामसमहासैन्यसहस्रैर्वज्रभिर्हतः ॥६॥ आयांतं
चंडिकाहष्ट्वातत्सैन्यमतिभीषणं ॥ ज्याखनैः प

रथामास्थयश्वलीगगनांतरं ||७|| ततःसिंहोमहा
नादमतीवकृतवान्नृप ||घंटास्वनेनतन्नादमंबि
काचोपबृंहयत ||८|| धनुर्ज्यासिंहघंटानांनादा
पूरितदिङ्मुखा || निनादैर्भीषणैःकालीजिग्येवि
स्तारितानना ||९|| तंनिनादमुपश्रुत्यदैत्यसैन्यै
श्चतुर्दिशं || देवीसिंहस्तथाकालीसरोषैःपरि।

उं
५२

वाविताः॥१०॥ एतस्मिन्नंतरे भूपविज्ञाताशयम्हरद्धि
णं॥ भवायामरसिंहो नामतित्रीर्थकलाद्विताः॥११
श्लेषाग्रहविस्त्रंतां तथैंद्रस्य च शाक्रयः॥ शरीरे
भ्यो विनिष्क्रम्य नद्रूपे षौडिकांयत्रुः॥१२॥ यस्यैव
स्य द्रूपं यस्याभूषणालवाहनं॥ नहदेवहितक्रूकि
रहतान्योडुमायथ्यौ॥१३॥ हंसप्रुकविमानाग्रे।

साक्षसूत्रकमंडलुः॥आयाताब्रह्मणःशक्तिर्ब्र
ह्माणीसाभिधीयते॥१४॥माहेश्वरीवृषारूढा
त्रिशूलवरधारिणी॥महाहिवलयाप्राप्ताचंद्र
रेखाविभूषणा॥१५॥कौमारीशक्तिहस्ताचम
यूरवरवाहना॥योद्धुमभ्याययौदैत्यानंबिकागु
हरूपिणी॥१६॥तथैववैष्णवीशक्तिर्गरुडोपरि

दुं
र्गा

संस्थिता ॥ शंखचक्रगदाशार्ङ्गःखड्गहस्ताभ्युपाय
यौ ॥ १७ ॥ यज्ञवाराहमतुलं रूपं याबिभ्रतो हरेः
शक्तिः साप्याययौ तत्र वाराहीं बिभ्रती तनुं ॥ १८ ॥
नारसिंही नृसिंहस्य बिभ्रती सदृशं वपुः ॥ प्राप्ता
तत्र सटाक्षेपक्षिप्तनक्षत्रसंहतिः ॥ १९ ॥ वज्रह
स्ता तथैवैंद्री गजराजोपरि स्थिता ॥ प्राप्ता सह

स्त्रनयना यथा शक्रस्तथैव सा ॥ २० ॥ ततः परिवृ-
तस्ताभिरीशानो देवशक्तिभिः ॥ हंन्यंतामसुराः
शीघ्रं मम प्रीत्याह चंडिका ॥ २१ ॥ ततो देवीशरी-
रात्तु विनिष्क्रांताति भीषणा ॥ चंडिकाशक्तिरत्यु-
ग्रा शिवाशतनिनादिनी ॥ २२ ॥ सा चाह धूम्र-
जटिलमीशानमपराजिता ॥ दूत त्वं गछ भग-

वस्त्रांश्चैस्तुंभति स्तुंभयो: ॥२३॥ ब्रह्मसंभंनिसंभं
वदानवावनिगर्वितो ॥ येत्राश्चेदानवाल्लयगु
ह्मायसन्नपस्थिता: ॥२४॥ त्रैलोक्यसिद्धोलभंतो
देवा:संतद्दविर्भुज: ॥ स्वयंप्रपातपातालेयदि
जीवितमिच्छथ ॥२५॥ बलावलेपादद्यापिवेइवं
तोग्रहकोविदा: ॥ तदागच्छतनत्स्पंतमक्षिवा

:पिशितेनच॥२६॥यतोनियुक्तोदौत्येनतया
देव्याशिवःस्वयं॥शिवदूतीतिलोकेस्मिंस्ततः
साख्यातिमागता॥२७॥तेपिश्रुत्वावचोदेव्याः
शर्वाख्यातंमहासुराः॥अमर्षापूरिताजग्मुर्य
त्रकात्यायनीस्थिता॥२८॥ततःप्रथममेवाग्रे
शरशक्त्यृष्टिवृष्टिभिः॥ववर्षुरुद्धतामर्षास्तां

उ.
९५

देवीसमनारयः ॥ २९ ॥ साचनान्वह्निनान्बाणास्त्रा
लचक्रपरश्वधान् ॥ विभ्रेदलीलपाध्मातधनुर्म
मैर्मदैभुभिः ॥ ३० ॥ नस्याग्रतस्तथाकालीशूलपा
नविदारितान् ॥ खट्वांगपोथितांश्चारीनकुर्वंती
मचरनदा ॥ ३१ ॥ कमंडलुजलाक्षेपहतवीर्या
नहतौजसः ॥ ब्रह्माणीचाकरोच्छत्रून्येनयेनस्म

धावति ॥३१॥ माहेश्वरी त्रिशूलेन तथा चक्रेण ।
वैष्णवी ॥ दैत्यान्जघान कौमारी तथा शक्त्याति
कोपना ॥३२॥ ऐंद्री कुलिशपातेन शतशो दैत्य
दानवं ॥ पेतुर्विदारिताः पृथ्व्यां रुधिरौघप्रवर्षि
णः ॥३३॥ तुंडप्रहारविध्वस्ता दंष्ट्राग्रक्षतवक्षसः
वाराहमूर्त्या न्यपतंश्चक्रेण च विदारिताः ॥३४॥

उ॰
२६

नखैर्विदारितांश्चान्यान्भक्षयंतीमहासुरान्॥ना
रसिंहीचचाराजौनादापूर्णदिगंबरा॥३६॥चं
डाट्टहासैरसुराःशिवदूत्याभिदूषिताः॥पेतुः
पृथिव्यांपतितांस्तांश्चखादाथसातदा॥३७॥इ
तिमातृगणंक्रुद्धंमर्दयंतंमहासुरान्॥दृष्ट्वाभ्यु
पायैर्विविधैर्नेशुर्देवारिसैनिकाः॥३८॥पलाय

नपरान्दृष्ट्वादैत्यान्मातृगणार्दितान् ॥ योद्धुमभ्या
ययौक्रुद्धोरक्तबीजोमहासुरः ॥३९॥ रक्तबिंदुर्य
दाभूमौपतत्यस्यशरीरतः ॥ समुत्पततिमेदिन्यां
तत्प्रमाणामहासुरः ॥४०॥ युयुधेसगदापाणिरिं
द्रशक्त्यामहासुरः ॥ ततश्चैंद्रीस्ववज्रेणरक्तबीज
मताडयत् ॥४१॥ कुलिशेनाहतस्याशुबहुसुस्रा

९७ वशोणितं ॥ समुत्तस्थुस्ततोयोधास्तद्रूपास्तत्परा
क्रमाः ॥ ५२ ॥ यावंतःपतितास्तस्यशरीराद्रक्तबिंद
वः ॥ तावंतःपुरुषाजातास्तद्वीर्यबलविक्रमाः ॥
५३ ॥ तेचापियुयुधुस्तत्रपुरुषारक्तसंभवाः ॥ समं
मातृभिरत्युग्रशस्त्रपातातिभीषणं ॥ ५४ ॥ पुनश्च
वज्रपातेनक्षतमस्यशिरोयदा ॥ ववाहरक्तंपु

रुधात्ततो जाताः सहस्रशः ॥४५॥ वैष्णवी समरे
चैनं चक्रेणाभिजघान ह ॥ गदया ताडयामास ऐ
न्द्रीतमसुरेश्वरं ॥४६॥ वैष्णवीचक्रभिन्नस्य रुधिरा
स्रावसंभवैः ॥ सहस्रशो जगद्व्याप्तं तत्प्रमाणैर्म
हासुरैः ॥४७॥ शक्त्या जघान कौमारी वाराही च
तथासिना ॥ माहेश्वरी त्रिशूलेन रक्तबीजं महा

उ.
९८

स्रवे ॥४८॥ सचापिगदयादैत्यः सर्वाएवाहनत्पृ
थक् ॥ मातॄःकोपसमाविष्टोरक्तबीजोमहासु
रः ॥४९॥ तस्याहतस्यबहुधाशक्तिशूलादिभि
र्भुवि ॥ पपातयोवैरक्तौघस्तेनासंछतशोसुराः
५० ॥ तैश्चासुरासृक्संभूतैरसुरैः सकलंजगत् ॥
व्याप्तमासीत्ततोदेवाभयमाजग्मुरुत्तमं ॥५१॥

तान्विषण्णान्सुरान्दृष्ट्वा चंडिका प्राह सत्वरा ॥ उ
वाच कालीं चामुंडे विस्तीर्णं वदनं कुरु ॥ ५२ ॥ मच्छ
स्त्रपातसंभूतान् रक्तबिंदून्महासुरान् ॥ रक्तबिं
दोः प्रतीछ त्वं वक्त्रेणानेन वेगिता ॥ ५३ ॥ भक्षयंती
चर रणे तदुत्पन्नान्महासुरान् ॥ एवमेष क्षयं दैत्य
: क्षीणरक्तो भविष्यति ॥ ५४ ॥ भक्ष्यमाणास्त्वया

चोग्रानचोत्पत्स्यंतिचापरे॥इत्युक्त्वातांततोदेवी
शूलेनाभिजघानतं॥५५॥मुखेनकालीजगृहे
रक्तबीजस्यशोणितं॥ततोसावाजघानाथग
दयातत्रचंडिकां॥५६॥नचास्यावेदनांचक्रेग
दापातोल्पिकामपि॥तस्याहतस्यदेहात्तुबहु
सुस्रावशोणितं॥५७॥यतस्ततस्तद्वक्त्रेणचा

मुंडासंप्रतीछति॥मुखेसमुद्गतायेस्यरक्तपाता
न्महासुराः॥६०॥तांश्चखादाथचामुंडापपौतस्य
चशोणितं॥देवीशूलेनवज्रेणबाणैरसिभिरृ
ष्टिभिः॥६१॥जघानरक्तबीजंतंचामुंडापीतशो
णितं॥सपपातमहीपृष्ठेशस्त्रसंघसमाहतः॥
६२॥नीरक्तश्चमहीपालरक्तबीजोमहासुरः॥ता

अथ ध्यानं ॥ सिंहस्था शशिशेखरा मरकतप्रख्या चतुर्भिर्भुजैः शं
खं चक्रधनुःशरांश्च दधती नेत्रैः त्रिभिः शोभिता ॥ आमुक्तांगद

४. नन्दे हर्षमतुलमवापुस्त्रिदशगणा नृप ॥ ६० ॥ तेषां
दु० मातृगणो जातो ननर्तासृग्मदोद्धतः ॥ इति मा
१०० र्कंडेयपुराणे सावर्णिके मन्वंतरे देवीमाहा
त्म्ये रक्तबीजवधो नामाष्टमोऽध्यायः ॥ ८ ॥ राजो
वाच ॥ विचित्रमिदमाख्यातं भगवन्भवता म
म ॥ देव्याश्चरितमाहात्म्यं रक्तबीजवधाश्रितं ॥ १

हारकंकणरणत्कांचीकणन्नूपुरा दुर्गा दुर्गतिहारिणी
भवतु नो रत्नोल्लसत्कुंडला ॥ ९ ॥

भूयश्चेछाम्यहंश्रोतंरक्तबीजेनिपातिते॥चकार
शुंभोयत्कर्मनिशुंभश्चातिकोपनः॥२॥ऋषिरु
वाच॥चकारकोपमतुलंरक्तबीजेनिपातिते॥
शुंभासुरोनिशुंभश्चहतेष्वन्येषुचाहवे॥३॥ह
न्यमानंमहासैन्यंविलोक्यामर्षमुद्वहन्॥अभ्य
धावन्निशुंभोथमुख्ययासुरसेनया॥४॥तस्या

दु॰ १०२

ग्रतस्तथा पृष्टे पार्श्वयोश्च महासुराः ॥ संदृष्टौष्ट
पुटाः क्रुद्धा हंतुं देवीमुपाययुः ॥ ५ ॥ आजगाम
महावीर्यः शुंभोपि स्वबलैर्वृतः ॥ निहंतुं चंडि
कां कोपात्कृत्वा युद्धं तु मातृभिः ॥ ६ ॥ ततो युद्ध
मतीवासीद्देव्याः शुंभनिशुंभयोः ॥ शरवर्षम
तीवोग्रं मेघयोरिव वर्षतोः ॥ ७ ॥ चिच्छेदास्तां

शरांस्ताभ्यांचंडिकास्वशरोत्करैः॥ताडयामा
सचांगेषुशस्त्रौघैरसुरेश्वरौ॥८॥निशुंभोनि
शितंखड्गंचर्मचादायसुप्रभं॥अताडयन्मूर्ध्नि
सिंहंदेव्यावाहनमुत्तमं॥९॥ताडितेवाहनेदे
वीक्षुरप्रेणासिमुत्तमं॥निशुंभस्याशुचिच्छेद
चर्मचाप्यष्टचंद्रकं॥१०॥छिन्नेचर्मणिखड्गेच

दे
१०२

शक्तिं चिक्षेप चामरः ॥ तामप्यस्या द्विधा चक्रे चा
क्रेणाभिमुखागतां ॥ ११ ॥ कोपाध्मातो निशुंभोऽ
थ शूलं जग्राह दानवः ॥ आयांतं मुष्टिपातेन दे
वी तच्चाप्यचूर्णयत् ॥ १२ ॥ आविध्याथ गदां सो
पि चिक्षेप चंडिकां प्रति ॥ सापि देव्या त्रिशूलेन
भिन्ना भस्मत्वमागता ॥ १३ ॥ ततः परशुहस्तं त

मायांतंदैत्यपुंगवं ॥ आहत्यदेवीबाणौघैरपात
यतभूतले ॥१४॥ तस्मिन्निपतितेभूमौनिशुंभेभी
मविक्रमे ॥ भ्रातर्यतीवसंक्रुद्धः प्रययौहंतुमं
बिकां ॥१५॥ सरथस्थस्तथात्युच्चैर्गृहीतपरमा
युधैः ॥ भुजैरष्टाभिरतुलैर्व्याप्याशेषंबभौनभः
॥१६॥ तमायांतंसमालोक्यदेवीशंखमवादयत

दु॰
१०३

ज्याशब्देनापिधनुषश्चकारातीवदुःसहं॥१७॥पू
रयामासककुभोनिजघंटास्वनेनच॥समस्तदै
त्यसैन्यानांतेजोवधविधायिना॥१८॥ततःसिंहो
महानादैस्त्याजितेभमहामदैः॥पूरयामासग
गनंगांतथैवदिशोदश॥१९॥ततःकालीसमु
त्पत्यगगनंक्ष्मामताडयत्॥कराभ्यांतन्निना

देनपाक्रवनास्तेतिरोह्निता:॥ २ ॥ प्रह्लादह्लासम
स्थिवंस्थिवहृतीचकारह॥ तैःप्राहैरमरास्तेभ्यं
भःकोपंपरंययौ॥ ३ ॥ दुरात्मन्तिष्ठतिष्ठेतिव्या
जहारांबिकायदा॥ तदाजयेतिभिह्नितंदेवैरा
कामासंस्थितैः॥ ४ ॥ शुंभेनागत्ययाशक्तिर्मुक्ता
ज्वालातिभीषणा॥ आयांतीवह्निकूटाभासा।

दुः
१०४

निरस्तामहोल्कया ॥२३॥ सिंहनादेनशुंभस्यआ-
प्तंलोकत्रयांतरं ॥ निर्घातनिस्वनोघोरोजितवा-
नवनीपते ॥२४॥ शुंभमुक्तान्शरान्देवीशुंभस्तत्प्र-
हितान्शरान् ॥ चिच्छेदस्वशरैरुग्रैःशतशोथस-
हस्रशः ॥२५॥ ततःसाचंडिकाक्रुद्धाशूलेनाभि-
जघानतं ॥ सतदाभिहतोभूमौमूर्छितोनिपपा

तद्व ॥२६॥ ततो निशुंभः संप्राप्य चेतनामात्तका-
र्मुकः ॥ आजघान शरैर्देवीं कालीं केसरिणं तथा
२७॥ पुनश्च कृत्वा बाहूनामयुतं दनुजेश्वरः ॥ चक्रा
युधेन दितिजश्छादयामास चंडिकां ॥ २८॥ ततो
भगवती क्रुद्धा दुर्गा दुर्गार्तिनाशिनी ॥ चिच्छेद
तानि चक्राणि स्वशरैः सायकांश्च तान् ॥ २९॥ त

उ॰
१०५

तोनिशुंभोवेगेनगदामादायचंडिकां ॥ अभ्यधा
वतवैदैत्यसेनासमाहृतः ॥ ३ ॥ तस्यापत
तएवाशुगदांचिच्छेदचंडिका ॥ खड्गेनशिततधा
रेणसचशूलंसमाददे ॥ ४ ॥ शूलहस्तंसमा
यांतंनिशुंभममरार्दनं ॥ हृदिविव्याधशूलेन
वेगाविद्धेनचंडिका ॥ ५ ॥ भिन्नस्यतस्यशू॰

लेनहृदयान्निसृतोपरः॥ महाबलोमहावीर्य
स्तिष्ठेतिपुरुषोवदन्॥ ३३॥ तस्यनिःक्रामतो
देवीप्रहस्यस्वनवत्ततः॥ शिरश्छिछेदखड्गेन
ततोसावपतद्भुवि॥ ३४॥ ततःसिंहश्चखादो
ग्रदंष्ट्राक्षुण्णशिरोधरान्॥ असुरांस्तांस्तथाका
लीशिवदूतीतथापरान्॥ ३५॥ कौमारीशक्ति

दु॰
१०६

निर्भिन्नाः केचिन्नेशुर्महाहताः ॥ ब्रह्माणीमंत्रपूता
तेन तोयेनान्ये निराकृता ॥३६॥ माहेश्वरीत्रि
शूलेन भिन्नाः पेतुस्तथापरे ॥ वाराहीतुंडघाते
न केचिच्चूर्णीकृता भुवि ॥३७॥ खंडंखंडं च चक्रे
ण वैष्णव्या दानवाः कृताः ॥ वज्रेण चैंद्रीहस्ता
ग्रविमुक्तेन तथापरे ॥३८॥ केचिद्विनेशुरसुराः

केचिन्नशामहाहवात॥ भक्षिताश्चापरेकाली
शिवदूतीमृगाधिपैः॥३९॥ इतिश्रीमार्कंडेयपुरा
णेसावर्णिकेमन्वंतरेदेवीमाहात्म्येनिशुंभव
धोनामनवमोध्यायः॥९॥ अथध्यानं॥ उत्त
प्तहेमरुचिरांरविचंद्रवह्निनेत्रांधनुःशरयुतां
कुशपाशशूलं॥ रम्यैःभुजैश्चदधतींशिवश

दु.
१०७

क्षिप्तांकामेश्वरींहृदिभजामिधृतेंदुलेखां॥इ
तिध्यानं॥ऋषिरुवाच॥निशुंभंनिहतंदृष्ट्वा
भ्रातरंप्राणसंमितं॥हन्यमानंबलंचैवशुंभः
क्रुद्धोब्रवीद्वचः॥१॥बलावलेपाद्दुष्टेत्वंमादु
र्गेगर्वमावह॥अन्यासांबलमाश्रित्ययुध्यसे
यातिमानिनी॥२॥देव्युवाच॥एकैवाहंज

गत्यत्रद्वितीयाकाममापरा॥ पश्यैतादुष्टमय्ये
वविशंत्योमद्विभूतयः॥३॥ऋषिरुवाच॥त
तःसमस्तास्तादेव्योब्रह्माणीप्रमुखालयं॥
तस्यादेव्यास्तनौजग्मुरेकैवासीत्तदांबिका
४॥देव्युवाच॥अहंविभूत्याबहुभि॥रिहरूपै
र्यदास्थिता॥तत्संहृतंमयैकैवतिष्ठाम्याजौ

दु
१०८

स्थिरोभव॥५॥ऋषिरुवाच॥ततःप्रववृतेयु
द्धंदेव्याःशुंभस्यचोभयोः॥पश्यतांसर्वदेवानां
असुराणांचदारुणं॥६॥शरवर्षैःशितैःशस्त्रै
स्तथास्त्रैश्चैवदारुणैः॥तयोर्युद्धमभूद्भूयःसर्व
लोकभयंकरं॥७॥दिव्यान्यस्त्राणिशतशोमु
मुचेयान्यथांबिका॥बभंजतानिदैत्येंद्रस्तत्

तीक्ष्णानकर्णैभिः ॥ मुक्तानि तेन चास्त्राणि दिव्यानि
परमेश्वरी ॥ बभंज लीलयैवोग्रहुंकारोच्चारणा
दिभिः ॥ ९ ॥ ततः शरशतैर्देवीमाच्छादयत सो ऽ
सुरः ॥ सापि तत्कुपिता देवी धनुश्चिच्छेद चेषुभिः
१० ॥ छिन्ने धनुषि दैत्येंद्रस्तथा शक्तिमथाददे ॥ चि
च्छेद देवी चक्रेण तामप्यस्य करे स्थितां ॥ ११ ॥ ततः

उ. ५ ष

खड्गमुपादायशतचंद्रंचभानुमत ॥ अभ्यधावत
तेदेवींदैत्यानामधिपेश्वरः ॥ १२ ॥ तस्यापततएवा
शुखड्गंचिच्छेदचंडिका ॥ धनुर्मुक्तैःशितैर्बा
णैश्चर्मचार्ककरामलं ॥ १३ ॥ हताश्वःसतदादै
त्यश्छिन्नधन्वाविसारथिः ॥ जग्राहमुद्गरंघोरं
मंबिकानिधनोद्यतः ॥ १४ ॥ चिच्छेदापततस्त

स्यमुद्गरंनिशितैःशरैः ॥ तथापिसोभ्यधावत्तांमु
ष्टिमुद्यम्यवेगवान् ॥१५॥ समुष्टिंपातयामासहृ
दयेदैत्यपुंगवः ॥ देव्यास्तंचापिसादेवीतलेनो
रस्यताडयत् ॥१६॥ तलप्रहाराभिहतोनिपपा
तमहीतले ॥ सदैत्यराजःसहसापुनरेवतथो
त्थितः ॥१७॥ उत्पत्यचप्रगृह्योच्चैर्देवींगगनमा

उ॰
११०

स्थितः॥ तत्रापि सा निराधारा मुद्गरेणेन चंडिका
८॥ निरुद्धं खेन दादैत्य श्रीडिका च परस्परं॥ चक्र
तेः प्रथमं युद्धं स्मानिविस्मयकारकं॥ ततो नि
युद्धं स विरं कृत्वा तेनाविकाम्सह॥१९॥ उत्पाश्च
भ्रामयामास विचित्रे पधरणीतले॥ सा चित्तो धर
ण्यां प्राप्य स्वशिष्य स्पवेगिनः॥२०॥ अथ धाव

तदस्यास्त्राचंडिकानिधनेच्छया॥ तमायांततो
देवीसर्वदैत्यजनेश्वरं॥२२॥जगत्यांपातयामास
भित्वाशूलेनवक्षसि॥सगतासुःपपातोर्व्यांदेवी
शूलाग्रविक्षतः॥२३॥चालयन्सकलांपृथ्वींसा
ब्धिद्वीपांसपर्वतां॥ततःप्रसन्नमखिलंहतेतस्
स्मिन्दुरात्मनि॥२४॥जगत्स्वास्थ्यमतीवापनि

उ:
१११

मंलंचाभवन्नभः॥उत्पातमेघाः सोल्कायेप्रागासं
स्तेशमंययुः॥२५॥सरितोमार्गवाहिन्यस्तथासंस्त
त्रपातिते॥ ततोदेवगणाः सर्वेहर्षनिर्भरमाना
साः॥२६॥बभूवुर्निहतेतस्मिन्गंधर्वाललितं
जगुः॥अवादयंस्तथैवान्येननृतुश्चाप्सरोगणाः
२७॥ववुः पुण्यास्तथावाताः सुप्रभोभूद्दिवाकरः

जज्वलश्चाग्नयः शांताः शांता दिग्जनितस्वनाः ॥२
८॥ इति मार्कंडेयपुराणे सावर्णिके मन्वंतरे देवी॥
माहात्म्ये शुंभवधो नाम दशमोध्यायः ॥१०॥ अथ
ध्यानं ॥ विद्युद्दामसमप्रभां मृगपतेः स्कंधस्थितां
भीषणां कन्याभिः करवालखेटविलसद्धस्ताभि
रासेवितां हस्तैश्चक्रगदासिखेटविशिखांश्चापं गु

उं
११२

ंतर्जनींविभ्राणामनलात्मिकांशशिधरांदुर्गांत्रिनेत्रांस्मरेत॥इतिध्यानं॥ऋषिरुवाच॥देव्याः
हतेतत्रमहासुरेंद्रेसेंद्रासुरावह्निपुरोगमास्तां॥
कात्यायनींतुष्टुवुरिष्टलाभाद्विकाशिवक्त्राब्जवि
काशिताशाः॥२॥देविप्रपन्नार्तिहरेप्रसीदप्रसी
दमातर्जगतोखिलस्य॥प्रसीदविश्वेश्वरिपाहि

विश्वंत्वमीश्वरी देवि चराचरस्य ॥ २ ॥ आधारभूता
जगतस्त्वमेका महीस्वरूपेण यतः स्थितासि ॥
अपां स्वरूपस्थितया त्वयैतदाप्यायते कृत्स्नम
लंघ्यवीर्ये ॥ ३ ॥ त्वं वैष्णवी शक्तिरनंतवीर्या विश्व
स्य बीजं परमासि माया ॥ संमोहितं देवि समस्त
मेतत्त्वं वै प्रसन्ना भुवि मुक्तिहेतुः ॥ ४ ॥ विद्याः स

दु.
११३

मस्तास्तवदेविभेदाःस्त्रियःसमस्ताःसकलाजग
त्सु॥त्वयैकयापूरितमंबयैतत्कातेस्तुतिस्तव्यप
रापरोक्तिः॥५॥सर्वभूतायदादेवीस्वर्गमुक्ति
प्रदायिनी॥त्वंस्तुतास्तुतयेकावाभवंतुपरमो
क्तयः॥६॥सर्वस्यबुद्धिरूपेणजनस्यहृदिसंस्थि
ते॥स्वर्गापवर्गदेदेविनारायणिनमोस्तुते॥७॥

कलाकाष्टादिरूपेण परिणामप्रदायिनि ॥ विश्व
स्योपरतौ शक्ते नारायणि नमोस्तुते ॥ ८ ॥ सर्वमं
गलमांगल्ये शिवे सर्वार्थसाधके ॥ शरण्ये त्र्यंब
के गौरि ॥ नारायणि ॥ ९ ॥ सृष्टिस्थितिविनाशा
नां शक्तिभूते सनातनि ॥ गुणाश्रये गुणमये ॥ ना
रायणि ॥ १० ॥ शरणागतदीनार्तपरित्राणप

दे
११४

रायणि ॥ सर्वस्यार्तिहरे देवि ॥ नारायणि ॥ ११ ॥ हं
सयुक्तविमानस्थे ब्रह्माणीरूपधारिणि ॥ कौशां
भःक्षरिके देवि ॥ नारायणि ॥ १२ ॥ त्रिशूलचंद्रा
हिधरे महावृषभवाहिनि ॥ माहेश्वरीस्वरूपेण
नारायणि ॥ १३ ॥ मयूरकुक्कुटवृते महाशक्ति
धरेनघे ॥ कौमारीरूपसंस्थाने ॥ नारायणि ॥ १४

शंखचक्रगदाशार्ङ्गगृहीतपरमायुधे ॥ प्रसीद
वैष्णवीरूपे ॥ नारायणि ॥ १५ ॥ गृहीतोग्रमहाच
क्रे दंष्ट्रोद्धृतवसुंधरे ॥ वराहरूपिणि शिवे ॥ नारा
यणि ॥ १६ ॥ नृसिंहरूपेणोग्रेण हंतुं दैत्यान्कृतो
द्यमे ॥ त्रैलोक्यत्राणसहिते ॥ नारायणि ॥ १७ ॥
किरीटिनि महावज्रे सहस्रनयनोज्ज्वले ॥ वृत्र

उ॰ प्राणहरेवैंद्रि॥ नारायणि॥१८॥ शिवदूतीस्वरू
११५ पेणहतदैत्यमहाबले॥ घोररूपेमहारावे॥ ना
रायणि॥१९॥ दंष्ट्राकरालवदनेशिरोमाला
विभूषणे॥ चामुंडेमुंडमथनेनारायणि॥२०॥
लक्ष्मिलज्जेमहाविद्येश्रद्धेपुष्टिस्वधेध्रुवे॥ म
हारात्रिमहाविद्येनारायणि॥२१॥ मेधेसरस्व

त्रिवरेभूतिकाभ्रविनामस्मि ॥ नियतेत्वंप्रसीदे
वीनारायणि ॥ २३ ॥ सर्वस्वरूपेसर्वेशेसर्वशा-
क्तिसमन्विते ॥ भयेभ्यस्त्राहिनोदेविदुर्गेदेविन
मोस्तुते ॥ २४ ॥ एतत्तेवदनंसौम्यंलोचनत्रया-
भूषितं ॥ पातुनःसर्वभूतेभ्यःकात्यायनिनमो
स्तुते ॥ २५ ॥ ज्वालाकरालमत्युग्रमशेषासुरसू

उ.
११६

दं॥त्रिशूलंपातुनोभीतेर्भद्रकालिनमोस्तुते
२४॥हिनस्तिदैत्यतेजांसिस्वनेनापूर्ययाजगत्
साघंटापातुनोदेविपापेभ्योनःसुतानिव॥।
असुरासृग्वसापंकचर्चितस्तेकरोज्ज्वलः॥शु
भायखड्गोभवतुचंडिकेत्वांनतावयं॥२६॥रो
गानशेषानपहंसितुष्टारुष्टातुकामान्सक

लानभीष्टान् । त्वामाश्रितानां नविपन्नराणां त्वा
माश्रिता ह्याश्रयतां प्रयांति ।। २७ ।। एतत्कृतं य
त्कदनं त्वयाद्य धर्मद्विषां देवि महासुराणां ।। रू
पैरनेकैर्बहुधात्ममूर्तिं कृत्वांबिके तत्प्रकरोति
कान्या ।। २८ ।। विद्यासु शास्त्रेषु विवेकदीपेष्वाद्ये
षु वाक्येषु च का त्वदन्या ।। ममत्वगर्तेतिमहांध

दुः
११७

कारे विभ्रामयत्येतदतीव विश्वं ॥३०॥ रक्षांसि य
त्रोग्रविषाश्च नागा यत्रारयो दस्युबलानि यत्र ॥
दावानलो यत्र तथाब्धिमध्ये तत्र स्थिता त्वं परिपा
सि विश्वं ॥३१॥ विश्वेश्वरि त्वं परिपासि विश्वं वि
श्वात्मिका धारयसीति विश्वं ॥ विश्वेशवंद्या भव
ती भवंति विश्वाश्रया ये त्वयि भक्तिनम्राः ॥३२॥

देविप्रसीदपरिपालयनोरिभीतेर्नित्यंयथासुर
वधादधुनैवसद्यः॥पापानिसर्वजगतांप्रशमं
नयाशुउत्पातपाकजनितांश्चमहोपसर्गान्॥
३३॥प्रणतानांप्रसीदत्वंदेविविश्वार्तिहारिणि
त्रैलोक्यवासिनामीड्येलोकानांवरदाभव।३४
देव्युवाच॥वरदाहंसुरगणावरंयन्मनसेच्छ।

दु॰
११८

य ॥ तेह्नमधुंप्रयक्कामिजगन्मामुपकारकं ॥ ३४ ॥
देवा ऊचुः ॥ सर्वबाधाप्रशमनं त्रैलोक्यस्याखिले
श्वरि ॥ एवमेव त्वया कार्यमस्मद्वैरिविनाशनं ॥
३५ ॥ देव्युवाच ॥ वैवस्वतेंतरे प्राप्ते अष्टाविंशति
ते मे युगे ॥ शुंभो निशुंभश्चैवान्यावुत्पत्स्येते महासु
रौ ॥ ३६ ॥ नंदगोपगृहे जाता यशोदागर्भसंभवा

नतस्तेनाशयिष्यामि विंध्याचलनिवासिनो ॥ ता
४८ ॥ उन्नयप्यति ते इमं हूपेणा पृथिवीतले ॥ अवा
तीर्यं ह्वनिष्यामि वै पवित्रांस्तु दानवान् ॥ ४९ ॥ अ
ह्वयं त्यास्तु तान् यान्वै पवित्रान् महादानवान् ॥ रक्ता
इंता भविष्यंति दाडिमीकुसुमोपमाः ॥ ५० ॥ ता
तो मां देवताः स्वर्गे मर्त्यलोके च मानवाः ॥ स्तुवं

उं ११५

तोऽभाद्भविष्यंति सततं तेरक्तदंतिकं ॥ ५१ ॥ अथ स्वगृहान
वार्षिकां सनाहूष्या सतेभक्ति ॥ मुनिभिः संस्तुता
भूमौ संभविष्यत्यथो निजा ॥ ५२ ॥ ततः शतेन नेत्रा
णां निरीक्षिष्यामि यत्क्षणीन् ॥ कीर्तयिष्यंति
मनुजाः प्रातान्ही स्मितिं मातलः ॥ ५३ ॥ ततोहम
खिलं लोकमात्मदेहसमं बुधैः ॥ भविष्यामिच

राः शाकैः रावृष्टेः प्राणधारकैः ॥४४॥ शाकंभरी
ति विख्यातिं तदा यास्याम्यहं भुवि ॥ तत्रैव च वधि
ष्यामि दुर्गमाख्यं महासुरं ॥४५॥ दुर्गादेवीति वि
ख्यातं तन्मे नाम भविष्यति ॥ पुनश्चाहं यदा भी
मं रूपं कृत्वा हिमाचले ॥४६॥ रक्षांसि भक्षयि
ष्यामि मुनीनां त्राणकारणात ॥ तदा मां मुनयः

दु॰
१२॰

सर्वे स्तोष्यंत्यानम्रमूर्तयः ॥५७॥ भीमादेवीति वि
ख्यातं तन्मे नाम भविष्यति ॥ यदारुणाख्यस्त्रैलो
क्ये महाबाधां करिष्यति ॥५८॥ तदाहं भ्रामरं रू
पं कृत्वा संख्येयषट्पदं ॥ त्रैलोक्यस्य हितार्थाय
वधिष्यामि महासुरं ॥५९॥ भ्रामरीति च मां लो
कास्तदा स्तोष्यंति सर्वतः ॥ इत्थं यदा यदा बाधा

दानवोत्थाभविष्यति॥५०॥ तदातदावतीर्याहं
करिष्याम्यरिसंक्षयं॥ इतिमार्कंडेयपुराणेसा
वर्णिकेमन्वंतरेदेवीमाहात्म्येनारायणीस्तुति
र्नामैकादशोध्यायः॥११॥ अथध्यानं॥ बाला
र्कोद्युतभास्वरांत्रिनयनांमंदस्मितांबीडुम्नवीण
जंबुइकलाधरास्तवकरीउष्यालिविंदाकुलां

उ.
१२१

कस्तूरीतिलकांगनास्तनवरांपाशांकुशौचन्न
सांकोटंकुंकुमभ्रमेश्रुमेवदधतींहस्तांबुजेतांभजे
त॥ इतिध्यानम्॥ देव्युवाच॥ एभिःस्तवैश्चमां
नित्यंस्तोष्यतेयःसमाहितः॥ तस्याहंसकलां
बाधांनाशयिष्याम्यसंशयं॥ १॥ मधुकैटभनाशं
चमहिषासुरघातनं॥ कीर्तयिष्यंतियेतद्वद्वधं

शुंभनिशुंभयोः ॥ २ ॥ अष्टम्यां च चतुर्दश्यां नवम्यां
चैकचेतसः ॥ श्रोष्यंति चैव ये भक्त्या मम माहात्म्य
मुत्तमं ॥ ३ ॥ न तेषां दुःकृतं किंचिद्दुःकृतोत्था न
चापदः ॥ भविष्यति न दारिद्र्यं न चैवेष्टवियोजनं
४ ॥ शत्रुतो न भयं तस्य दस्युतो वा न राजतः ॥ न श
स्त्रानलतोयौघात्कदाचित्संभविष्यति ॥ ५ ॥ त

दु॰
१२२

स्याममैतन्माहात्म्यंपठितंसम्यसमाहितैः ॥ श्रोत
व्यंचसदाभक्त्यापरंस्वस्त्ययनंमहत् ॥ ६ ॥ उपसर्गा
नशेषांस्तुमहामारीसमुद्भवान् ॥ तथात्रिवि
धमुत्पातंमाहात्म्यंशमयेन्मम ॥ ७ ॥ यत्रैतत्पठ्य
तेसम्यङ्नित्यमायतनेमम ॥ सदानतद्विमोक्ष्या
मिसान्निध्यंतत्रमेस्थितं ॥ ८ ॥ बलिप्रदानेपूजा

यामग्निकार्ये महोत्सवे ॥ सर्वं ममैतच्चरितमुच्चा
र्यं श्राव्यमेव च ॥ ९ ॥ जानताजानता वापि बलिपू
जां तथा कृतं ॥ प्रतीच्छिष्याम्यहं प्रीत्या वह्निहोमं त
था कृतं ॥ १० ॥ शरत्काले महापूजा क्रियते या च वा
र्षिकी ॥ तस्यां ममैतन्माहात्म्यं श्रुत्वा भक्तिसम
न्वितः ॥ ११ ॥ सर्वबाधाविनिर्मुक्तो धनधान्यसम

दु॰
१२३

न्वितः॥ मनुष्यो मत्प्रसादेन भविष्यति न संशयः।
१२॥ श्रुत्वा ममैतन्माहात्म्यं तथा चोत्पत्तयः शुभाः
पराक्रमं च युद्धेषु जायते निर्भयः पुमान्॥ १३।
रिपवः संक्षयं यांति कल्याणं चोपपद्यते॥ नंद
ते च कुलं पुंसां माहात्म्यं मम शृण्वतां॥ १४॥ शां
तिकर्माणि सर्वत्र तथा दुःस्वप्नदर्शने॥ ग्रहपी

ड्डामचोग्रास्त्रमाहात्म्यं शृणुयान्मम ॥५॥ उपस
र्गाः शामं यांति ग्रहपीडाश्च दारुणाः ॥ ॐः सर्वमेव
नमिर्हंहंस स्वमसु प्रजायते ॥६॥ बालग्रहाभि
भूतानां बालानां शांतिकारकं ॥ संज्ञानभेदे वा
नराणां मैत्रीकरणमुत्तमं ॥७॥ ॐर्हं नानामशेषा
णां बलहानिकरं परं ॥ रक्षोभूतपिशाचानां प

उ:
१२४

वनादेवनाशनं॥१८॥सर्वमप्येतत्स्मात्स्थं समा
सन्निधिकारकं॥पत्रपुष्पार्घधूपैश्च गंधदीपैश्च
शोभनैः॥१९॥विप्राणां भोजनेर्दानैर्मैत्रीरत्नाभयेन
हर्निशं॥अन्यैश्च विविधैर्भोगैः प्रदानैर्वस्त्रभूषा
या॥२०॥प्रीतिमेक्रियतेसास्मिन्स्मृत्वाश्रवितेश्र
ते॥अनंतहरतिपापानितथा रोगं प्रयच्छति॥२१॥

रक्षांकरोतिभूतेभ्योजन्मनांकीर्तनेमम ॥ युद्धेषु
चरितंयन्मेदुष्टदैत्यनिबर्हणं ॥२२॥ तस्मिन्श्रुते
वैरिकृतंभयंपुंसांनजायते ॥ युष्माभिस्तुतयोयाः
श्चयाश्चब्रह्मर्षिभिःकृताः ॥२३॥ ब्रह्मणाचकृता
यास्तुप्रयच्छंतिशुभांमतिं ॥ अरण्येप्रांतरेवापिदा
वाग्निपरिवारितः ॥२४॥ दस्युभिर्वावृतःशून्येग्र

दु॰ हीतोवापिशत्रुभिः॥ सिंहव्याघ्रानुयातोवावने
१२५ वावनहस्तिभिः॥२५॥ राज्ञाक्रुद्धेनवाज्ञप्तोवध्यो
वंधगतोपिवा॥ आघूर्णितोवावातेनस्थितःपो
तेमहार्णवे॥२६॥ पतत्स्वापिशस्त्रेषुसंग्रामेभृ
शदारुणे॥ सर्वाबाधासुघोरासुवेदनाभ्यर्दितो
पिवा॥२७॥ स्मरन्ममैतच्चरितंनरोमुच्येतसंकटा

त॥ममप्रभावात्सिंहाद्यादस्यवोवैरिणस्तथा॥२९
दूरादेवपलायंतेस्मरतश्चरितंमम॥ऋषिरुवाच
इत्युक्त्वासाभगवतीचंडिकाचंडविक्रमा॥३०॥
पश्यतामेवदेवानांतत्रैवांतरधीयत॥तेपिदेवा
ःनिरातंकाःस्वाधिकारान्यथापुरा॥३१॥यज्ञभा
गभुजःसर्वेचक्रुर्विनिहतारयः॥दैत्याश्चदेव्या

दु॰
१२६

निहतेशुंभेदेवरिपौयुधि ॥ ३१ ॥ जगद्विध्वंसिनितस्
स्मिन्महोग्रेतुलविक्रमे ॥ निशुंभेचमहावीर्येशे
षाःपातालमाययुः ॥ ३२ ॥ एवंभगवतीदेवीसा
नित्यापिपुनःपुनः ॥ संभूयकुरुतेभूपजगतःप
रिपालनं ॥ ३३ ॥ तयैतन्मोह्यतेविश्वंसैवविश्वंप्र
सूयते ॥ सायाचिताचविज्ञानंतुष्टाऋद्धिंप्रयच्छ

ति ॥३४॥ व्याप्तंतयैतत्सकलंब्रह्मांडंमनुजेश्वर ॥
महाकाल्यामहाकालेमहामारीस्वरूपया ॥३५
सैवकालीमहामारीसैवसृष्टिर्भवत्यजा ॥ स्थि
तिंकरोतिभूतानांसैवकालीसनातने ॥ ३६॥
भवकालेनृणांसैवलक्ष्मीर्वृद्धिप्रदागृहे ॥ सै
वाभावेतथालक्ष्मीर्विनाशायोपपद्यते ॥ ३७॥

दु॰ १२२ स्तुता संपूजिता पुष्पैर्धूपगंधादिभिस्तथा ॥ ददा
ति वित्तं पुत्रांश्च मतिं धर्मे तथा शुभां ॥ ३८ ॥ इति मा
र्कंडेयपुराणे सावर्णिके मन्वंतरे देवीमाहा
त्म्ये फलानुकीर्तनं नाम द्वादशोऽध्यायः ॥ १२ ॥ अ
थ ध्यानं ॥ रक्ताब्धिपोतारुणपद्मसंस्थां पाशांकु
शौ विद्धशारासिचापान् ॥ शूलं कपालं दधतीं

कराब्जैरकां त्रिनेत्रां प्रणमामि देवीं ॥ इति ध्यानं ॥
ऋषिरुवाच ॥ एतत्ते कथितं भूप देवीमाहात्म्य-
मुत्तमं ॥ एवंप्रभावा सा देवी ययेदं धार्यते जगत्
२ ॥ विद्या तथैव क्रियते भगवद्विष्णुमायया ॥ त-
या त्वमेष वैश्यश्च तथैवान्ये विवेकिनः ॥ ३ ॥ मो-
ह्यंते मोहिताश्चैव मोहमेष्यंति चापरे ॥ तामुपैहि

दु॰
१२८

महाराजशरणंपरमेश्वरीं ॥४॥ आराधितासैवा
नृणांभोगस्वर्गापवर्गदा ॥ मार्कंडेयउवाच ॥
इतितस्यवचःश्रुत्वासुरथःसनराधिपः ॥ प्रा
णिपत्यमहाभागंतमृषिंशंसितव्रतं ॥ निर्विं
णोतिममत्वेनराज्यापहरणेनच ॥५॥ जगाम
सद्यस्तपसेसचवैश्योमहामुने ॥ संदर्शनार्थं

मंबायानदीपुलिनसंस्थितः ॥ ६ ॥ सचवैश्यस्तप
स्तेपेदेवीसूक्तंपरंजपन् ॥ तौतस्मिन्पुलिनेदेव्याः
कृत्वामूर्तिंमहीमयीं ॥ ७ ॥ अर्हणांचक्रतुस्तस्याः
पुष्पधूपाग्नितर्पणैः ॥ निराहारौयतात्मानौत
न्मनस्कौसमाहितौ ॥ ८ ॥ ददतुस्तौबलिंचैवनि
जगात्रासृगुक्षितं ॥ एवंसमाराधयतोस्त्रिभिर्वर्षैः

उ:
१२९

धैर्येनात्मनोः॥९॥ परित्यक्ताजनगृहाश्रीप्रत्ययसंज्ञया।
हरिचडिकां॥ देव्युवाच॥ यत्साथ्येनेत्वयाभूपत्वया
चकुलनंदन॥१०॥ मत्सत्वाप्यतोसर्वंपरित्यक्ष
दरास्मितत॥ मार्कंडेयउवाच॥ ततोवद्भेरूपोत्सृ
ज्यमविभ्रंशप्रत्यजन्मनि॥११॥ श्रेष्ठेवचनिजंराज्यं
हत्वाणुबलंबलात॥ सोपिवैश्यस्ततोज्ञानंव

ष्टेतिविस्मितमानसः ॥१४॥ ममेत्यहमितिप्राज्ञः सं
गविच्युतिकारकं ॥ देव्युवाच ॥ स्वल्पैरहोभिर्नृप
तेस्वंराज्यंप्राप्स्यतेभवान ॥ हत्वारिपूनस्खलितं
तत्रभविष्यति ॥१५॥ मृतश्चभूयःसंप्राप्यजन्मदे
वाद्विवस्वतः ॥ सावर्णिकोमनुर्नामभवान्भुवि
भविष्यति ॥१६॥ वैश्यवर्यत्वयायश्चवरोस्मत्तो

दुं॰
१३०

भिवांछितः॥तेप्रयछामिसंसिद्धैतवज्ञानंभवि
ष्यति॥१९॥मार्कंडेयउवाच॥इतिदत्वातयोर्दे
वीयथाभिलषितंवरं॥बभूवांतर्हितासद्योभक्त्या
ताभ्यामभिष्टुता॥२॥एवंदेव्यावरंलब्ध्वासुरथः
क्षत्रियर्षभः॥सूर्याज्जन्मसमासाद्यसावर्णिर्भ
वितामनुः॥इतिश्रीमार्कंडेयपुराणेसावर्णिके

मन्वंतरे देवी माहात्म्ये सुरथ वैश्य वर प्रदानं नाम त्रयोदशोऽध्यायः ॥ १३ ॥

शुभ म दं लेखक पाठकयोः ॥

ॐनमोभगवत्यैभवान्यै॥ राजोवाच॥ भगवन्नव
तारामेचंडिकायास्त्वयोदिताः॥ एतेषांप्रकृतिं
ब्रह्मन्प्रधानंवक्तुमर्हसि॥ १॥ आराध्यंयन्मयादे
व्याःस्वरूपंयेनचद्विज॥ विधिनाब्रूहिसकलंय
थावत्प्रणतस्यमे॥ २॥ ऋषिरुवाच॥ इदंरहस्यंप
रममनाख्येयंप्रचक्षते॥ भक्तोसीतिनमेकिंचि

दु॰
१

स्वाहाकारं नराधिपं ॥३॥ सर्वस्याद्या महालक्ष्मी
स्त्रिगुणा परमेश्वरी ॥ लक्ष्यालक्ष्यस्वरूपा सा व्याप्य
कृत्स्नं व्यवस्थिता ॥४॥ मातुलिंगं गदां खेटं पान
पात्रं च बिभ्रती ॥ नागं लिंगं च योनिं च बिभ्रती
नृपमूर्धनि ॥५॥ तप्तकांचनवर्णाभा तप्तकां
चनभूषणा ॥ शून्यं तदखिलं स्वेन पूरयामास

तेजसा ॥ ६ ॥ स्थूलेन दरविलं लोके विलोक्य पर
मेश्वरी ॥ बभार रूपमखिलं तमसा केवलेन हि
७ ॥ साभिन्नांजनसंकाशा दंष्ट्रांचितवरानना ॥
विशाललोचना नारी बभूव तनुमध्यमा ॥ ८ ॥
खड्गपात्रशिरःखेटैरलंकृतचतुर्भुजा ॥ कबंध
हारं शिरसा बिभ्राणा हि शिरःस्रजं ॥ ९ ॥ साप्रो

दु.
९

वाचमहालक्ष्मीतामसीप्रमदोत्तमा ॥ नामकर्मेच
मेमातर्देहितुभ्यंनमोनमः ॥१०॥ तांश्रीवाचमहा
लक्ष्मीस्तामसीदिव्यलोचनां ॥ ददास्मितवनामा
नियान्निकर्माणितानिते ॥११॥ महामायामहा
कालीमहामारीक्षुधातृषा ॥ निद्रातृष्णाचैकवी
राकालरात्रिर्दुरत्यया ॥१२॥ इमानितवनामानि

प्रतिपाद्यानि तेमया ॥ एभिः कर्माणि तेक्तान्वायोध्यो
तेसोब्ध तेमतं ॥ १३ ॥ नामिस्त्वा महालक्ष्मीः स्व
रूपं परमं रूप ॥ सत्वाख्येनातिशुद्धेन गुणेनेन्दुप्रभं
ददे ॥ १४ ॥ अक्षमालां कुशधरा वीणापुस्तकधारि
णी ॥ सा बभूव वरा नारी नामान्यस्यै च सा ददौ ॥ १५
महाविद्या महावाणी भारती वाक्सरस्वती ॥ आ

दुर॰
३

र्याब्राह्मीमहाधेनुर्वेदगर्भाचधीश्वरी ॥६॥ अथोवा
चमहालक्ष्मीर्महाकालीसरस्वती ॥ युवांजनय
तांदेव्यौमिथुनेस्वानुरूपतः ॥७॥ इत्युक्त्वातेमहा
लक्ष्मीःससर्जमिथुनेस्वयं ॥ हिरण्यगर्भौरुचिरौ
स्त्रीपुंसौकमलासनौ ॥८॥ ब्रह्मन्विधेविरिंचे
तिधातरित्याहतंनरं ॥ श्रीःपद्मेकमलेलक्ष्मीत्या

हस्मानास्त्रियंचतौ ॥ ९ ॥ महाकालीभारतीचमिथु
नेस्वजनतः सह ॥ एतयोरपिद्वपाणिनामानिचव
दाम्यिते ॥ १० ॥ नीलकंठंरक्तबाहुंश्वेतांगंचंद्रशेख
रं ॥ जनयामासवृषभंमहाकालीसितांस्त्रियं ॥ ११
सरुद्रः शंकरः स्थाणुःकपर्दीचत्रिलोचनः ॥ त्रयी
विद्याकामधेनुः शास्त्रीभाषाक्षरास्वराः ॥ १२ ॥ सा

३२
४

रस्वतीस्त्रियंगौरीकुमारंचपृथक्रूपं ॥ जनयामा-
सनामानिरयोरपिवदास्मिते ॥२३॥ विस्नुःकृस्नो
हृषीकेशोवासुदेवोजनार्दनः ॥ उमागौरीसती
चंडीसुंदरीसुभगाशुभा ॥२४॥ एवंस्त्रुवतयःसृष्टः
पृथक्त्वंसंपेदिरे ॥ चतुर्ष्वंतोनुपश्यंतिनेनरेत
हिदोजनाः ॥२५॥ ब्रह्मणेप्रददौपत्नींमहालक्ष्मी

न्तंपश्यंती ॥ कन्द्रायगोगौवरदोवासहदेवायचक्रियं
२६ ॥ स्वरयासहसंभूयविरिंचोऽजमजीजनत ॥ वि
भेदभगवानरुद्रस्त्रैघोसहवीर्यवान् ॥ २७ ॥ अं
उमथेप्रधानादिकार्यंजातमभूत्स्वप ॥ महाभूता
त्मकंसर्वंजगत्स्थावरजंगमं ॥ २८ ॥ पुपोषपाल
यामासतत्लक्ष्म्यासहकेशवः ॥ महालक्ष्मीमे

दु.र.
५

ह्यागज्जगत्सर्वंमृयीश्वरी॥२९॥ निराकाराचसा
कारासैवनानाभिधानभृत्॥ नामांतरैर्निरूप्यैषा
नाम्नानान्येनकेनचित॥३०॥ इतिश्रीमार्कंडेय
पुराणेसावर्णिकेमन्वंतरेदेवीमाहात्म्येप्राधा
निकेरहस्यंनामचतुर्दशोध्यायः॥१४॥ ऋषिरु
वाच॥ त्रिगुणातामसीदेवीसात्विकीयात्रिधो

दिका॥ सा क्षामा चंडिका दुर्गा भद्रा भगवतीत्य॥१
योगनिद्रा हरेरुक्ता महाकाली नमोगुणा॥ म
धुकैटभनाशार्थं यां तुष्टावांबुजासनः॥२॥ दश
वक्त्रा दशभुजा दशपादांजनप्रभा॥ विशालया
राजमाना त्रिंशल्लोचनमालया॥३॥ स्फुरद्दशन
दंष्ट्रा सा भीमरूपापि भूमिपा॥ रूपसौभाग्यकां

दुर॰
६

तीनांसाप्रतिष्ठांमहाश्रियं॥४॥ खड्गबाणगदा
शूलशंखचक्रकपालभृत्॥ परिघंकार्मुकंशी
र्षंनिश्च्योतद्रुधिरंदधौ॥५॥ एषासावैष्णवीमाया
महाकालीदुरत्यया॥ आराधितावशीकुर्यात्पू
जाकर्तुश्चराचरं॥६॥ सर्वदेवशरीरेभ्योयावि
र्भूतामितप्रभा॥ त्रिगुणासामहालक्ष्मीसाक्षा

महिषमर्दिनी ॥७॥ श्वेताननानीलभुजासुश्वेता-
स्तनमंडला ॥ रक्तमध्यारक्तपादानीलजंघोरुरु-
न्मदा ॥८॥ सुचित्रजघनाचित्रमाल्यांवरविभूषणा
चित्रानुलेपनाकांतिरूपसौभाग्यशालिनी ॥९॥
अष्टादशभुजाचैषासासहस्रभुजासती ॥ आयुधा-
न्यत्रवक्ष्यंतेदक्षिणाधःकरक्रमात् ॥१०॥ अक्षमा-

ग्रं
७

लां च कमलं बाणासिः कुलिशं गदा ॥ चक्रं त्रिशूलं परशुः शंखं घंटा च पाशकः ॥ ११ ॥
शक्तिर्दंडश्चर्म चापं पानपात्रं कमंडलु ॥ अलंकृतभुजामेभिरायुधैः कमलासनां ॥ १२ ॥
सर्वदेवमयीमीशां महालक्ष्मीमिमां नृप ॥ पूजयेत्सर्वलोकानां स देवानां प्रभुर्भवेत् ॥ १३ ॥
गौरीदेहात्समुद्भूता

या सत्वैकगुणाश्रया॥ साक्षात्सरस्वती प्रोक्ता शुं
भासुरनिबर्हिणी॥१४॥ ददौ चाष्टभुजा बाला
मुसले शूलचक्रभृत॥ शंखं घंटां लांगलं च का
र्मुकं वसुधाधिप॥१५॥ एषा संपूजिता भक्त्या सर्व
ज्ञत्वं प्रयच्छति॥ निशुंभमथनी देवी शुंभासुरनि
बर्हिणी॥१६॥ इत्युक्तानि स्वरूपाणि मूर्तीनां त

दु॰
८

वपुश्शिवं॥उमांसनंजगन्मातुःप्रथमांसंत्रिधा
मय॥१७॥महालक्ष्मीर्यदाकृष्णामहाकालीस
रस्वती॥दक्षिणोत्तरयोःपृष्ठेहस्तौमिथुना
त्रयं॥१८॥विरिंचिःस्वरयामध्येरुद्रोगौर्याचद
क्षिणे॥वामेलक्ष्म्याहृषीकेशःपुरतोदेवतात्र
यं॥१९॥अष्टादशभुजामध्येवामेचास्यादशानन

ना॥ दक्षिणेहभुजा लक्ष्मीर्ब्रह्मांणणाद्यायथाक्र
मं॥२॥ सर्वादिदलतः सज्यास्थितां गाद्यहभेरा
वाः॥ अष्टादशभुजा चैषा यदा सज्या नराधिप
३॥ दशानना चाष्टभुजा दक्षिणोत्तरयोस्तथा
दशानना यदा सज्या दक्षिणोत्तरयोस्तदा॥४
५॥ कालसप्ताश्च वसं सज्यो सर्वारिष्टप्रशांतये

दुरं
८

पद्मचापाष्टभुजा संङ्गपाणु भास्वरनिवर्हिणी ॥२३॥ ना
वास्याः शाकय: स्तुत्यास्तदा रुद्रविनायकौ ॥ नमो
देव्या इति स्तोत्रैर्महालक्ष्मीं समर्चयेत् ॥२४॥ प्रव
तारत्रयाचार्यं स्तोत्रमंत्रास्तदाश्रयाः ॥ अष्टादशा
भुजा चैषा पूज्या महिषमर्दिनी ॥२५॥ महालक्ष्मी
र्महाकाली सैव प्रोक्ता सरस्वती ॥ ईश्वरीगुणपा

पानां सर्वलोकमहेश्वरी ॥ २६ ॥ मां हि घातकरी येन
रक्षिता सज्जगत्प्रभुः ॥ स्तूयते जगतां धात्री चंडिका
भक्तवत्सला ॥ २७ ॥ प्रश्नादिभिरलंकारैर्गंधपुष्पो।
त्क्षोत्तमैः ॥ धूपैर्दीपैश्च नैवेद्यैर्नानाभक्ष्यसमन्वि
तैः ॥ २८ ॥ रुधिराक्तेन बलिना मांसेन सुरया नृप
प्रणामाचमनीयेन चंदनेन सुगंधिना ॥ २९ ॥ स

उं. १०

कर्पूरैस्सुरतां कुलैर्भक्तिभावसमन्वितैः ॥ वामभागे
प्रेतो देव्याः क्षित्रशीर्षं महास्वरं ॥ ३८ ॥ पूजयेन्माहि
षं येन ग्रामं साधुज्यमाप्नुयात् ॥ दक्षिणे पुरतः सिं
हं समग्रं धर्म्मसीश्वरं ॥ ३९ ॥ वाहनं पूजयेद्देव्या धृतं
येन चराचरं ॥ ततः कृतांजलिर्भूत्वा स्तुवीत चरि
तैरिमैः ॥ ४० ॥ ऊर्यान्नु स्तवनं धीमान्न तस्यामेका॥

ग्रमाःनमः ॥ एकेनवामध्यमेननैकेनतवयोविद्
रुत ॥ चरित्रार्धेनचजपेत्तपन्नाच्छिद्रमवाप्नुयात् ॥
स्तोत्रमंत्रैःस्तवीतेषांयदिवाजगदंबिकां ॥ ३४ ॥ श्रो
प्रदक्षिणानमस्कारान्कृत्वामूर्ध्निकृतांजलिः ॥
क्षमापयेजगद्धात्रींमुहुर्मुहुरतंद्रितः ॥ ३५ ॥ प्र
तिश्लोकंचजुहुयात्पायसंतिलसर्पिषा ॥ जुहु

३ ११

यास्तोत्रमेतैर्वा चंडिकायैशुभं हविः ॥२६॥ भूमौ
नामपदैर्देवीं पूजयेत्सुसमाहितः ॥ प्रयतः प्रांज
लिः प्रह्वः प्रणम्यारोप्य चात्मनि ॥२७॥ सुचिरं भा
वयेदीशां चंडिकां तन्मयो भवेत् ॥ एवं यः पूजये
द्भक्त्या प्रत्यहं परमेश्वरीं ॥२८॥ भुक्त्वा भोगान्यथा
कामं देवीसायुज्यमाप्नुयात् ॥ यो न पूजयते भ

क्रोशाच्चंडिकांभक्तवत्सलां ॥ २४ ॥ भस्मीकृत्यास्सुग्रा
णानिनिर्दहेन महेश्वरी ॥ तस्मात्त्वंजयभूपाल
सर्वलोकमहेश्वरीं ॥ यथोक्तेनविधानेनचंडि
कामत्वमाप्स्यसि ॥ ४ ॥ इतिश्रीमार्कंडेयपुरा
णेसावर्णिकेमन्वंतरेदेवीमाहात्म्येप्रकृतिव
कृत्यंनामपंचदशोध्यायः ॥ १५ ॥ ऋषिरुवाच ॥

उर.
१२

नंदाभगवतीनामयाभविष्यतिनंदजा॥सास्व
तामज्ञितानित्यंवश्रीकृर्याज्जगत्रयं॥१॥कनको
त्तमकांति:सासकांतिकनकांवरा॥देवीकन
कवर्णाभाकनकोत्तमभूषणा॥२॥कमलांकु
शपाशाब्जैरलंकृतचतुर्भुजा॥इंदिराकमला
लक्ष्मी:साश्रीरुक्मांबुजासना॥३॥पारमदे

त्रिकानामसादेवीप्रोक्तामयानका ॥ तस्याःस्वरूपं
वक्ष्यामिशृणुपापभयापहं ॥ ४ ॥ रक्तांबरार
क्तवर्णारक्तसर्वांगभूषणा ॥ रक्तायुधारक्तने
त्रारक्तकेशातिभीषणा ॥ ५ ॥ रक्ततीक्ष्णनखार
क्तदशनारक्तदंतिका ॥ पतिंनारीवानुरक्ता
देवीभक्तंभजेज्जनं ॥ ६ ॥ वसुधैवविशालासा

३४
१३

मेरुशृगलसल्लमी ॥ दीर्घौ लंबावतिस्थूलौ नाव
तीव मनोरमौ ॥७॥ कर्कशावतिकोनौ नौ सर्वा
नंदपयोनिधी ॥ भक्तानामपायघ्नौ दैवी सर्व
कामदुघौ स्तनौ ॥८॥ वक्त्रपाशं च सस्तूलं लो
गले च विभर्ति सा ॥ स्त्राल्पानां रक्तचामुंडादे
वी पीगे स्वरीति च ॥९॥ अनयाप्यासमस्विले

जगत्स्थावरजंगमे॥ इमांयःपूजयेद्भक्त्यास
व्याप्नोतिचराचरं॥१०॥ अधीतेयइमंनित्यंर
क्तदंत्यावपुःस्तवं॥ तंसापरिचरेद्देवीपतिंप्रिय
मिवांगना॥११॥ शाकंभरीनीलवर्णानीलोत्प
लविलोचना॥ गंभीरनाभिस्त्रिवलीविभूषि
ततनूदरी॥१२॥ सुककर्कशसमोत्तुंगवृत्तपी

उ॰ १८ घनस्तनी ॥ मुष्टिंशिलीमुखापूर्णंकमलेक-
मलालया ॥ २३ ॥ पुष्पपल्लवमूलादिफलाढ्यं-
शाकसंचयं ॥ काम्यानंतरसैर्युक्तंक्षुत्तृष्णामृत्यु-
जरापहं ॥ २४ ॥ कार्मुकंचस्फुरत्कांतिबिभ्रतीप-
रमेश्वरी ॥ शाकंभरीशताक्षीसासैवदुर्गाप्रकी-
र्तिता ॥ २५ ॥ उमागौरीसतीचंडीकालिकासा-

नुपावंती ॥ शाकंभरीस्तुवंध्यायंजपन्संपूजयन्न
मन् ॥ १६ ॥ अक्षयमस्नुतेशीघ्रमन्नपानरसामृ
त ॥ भीमापिनीलवर्णासादंष्ट्रादशनभासुरा ॥
१७ ॥ विशाललोचनानारीपीनोन्नतपयोधरा ॥
चंद्रहासंचडमरुंशिरःपात्रंचबिभ्रती ॥ १८ ॥ एक
वीराकालरात्रिसैवोक्ताकामदास्तुता ॥ तेजोमं

३४
१५

ज्वलत्कुंडलयोर्भ्रामंरीचिचित्रकांतिभृत ॥१९॥ चित्रांग
लेपनाद्देवीचित्राभरणभूषिता ॥ चित्रभ्रमरणा-
ला:सामहामायेतिगीयते ॥२०॥ इतितेवर्णयो
देव्याव्याख्यातावसुधाधिप ॥ जगन्मातुश्चंडिका
या:कीर्तिताकामधेनव: ॥२१॥ इदंरहस्यंपरम
मतवाच्यंकथितंत्वया ॥ व्याख्यानंदिव्यमूर्तीना-

मभीष्टफलदायकं ॥ २२ ॥ इति श्रीमार्कंडेयपुराणे
सावर्णिके मन्वंतरे देवीमाहात्म्ये मूर्तिरहस्यं ना
म षोडशोध्यायः ॥ १६ ॥ ऋषिरुवाच ॥ क्रमेणार
ण्ये देवीरूपावावामदक्षिणे ॥ मध्ये तु पूजयेद्रू
पं देवीमाहात्म्यदिनायवे ॥ १ ॥ रजोमूर्त्याश्रितां ल
क्ष्मीं तामसीं शत्रुनाशिनीं ॥ सत्वमूर्तिं देवीं ज्ञा

उं ६९

नमितिपूजाविधिःफलं ॥ १ ॥ यज्ञोमंडलयादेवी
चतुर्हस्तांबुजासना ॥ आदिप्रणवसंयुक्तापूज्या
चैवप्रयत्नतः ॥ ३ ॥ नमोमंडलयांदेवींचंडिका
परमेश्वरी ॥ अष्टासमयसंयुक्तापूजयेत्तविच
क्षणः ॥ ४ ॥ सत्वमंडलजादेवीज्ञानमूर्तीःशु
भव्रतिः ॥ गुरुप्रणवसंयुक्तादेव्याःपूजांतिका

रयेत ॥५॥ सृजाग्रे सृजयेच्चैव ततस्तन्मिथुना
त्रयं ॥ प्रथमं सृजयेत्कूटं सृजयेत्कृत्तिकाष्टकं ॥
६॥ सृज्याग्रे शौचादिकागालाः सृजाल्लेत्र स्यमंड
ले॥ वाहनं सृजयेद्देव्या धृतं येन चराचरं ॥७॥
पंचप्राणवसंयुक्तो नामसौ चैव सृजयेत् ॥८॥
ऋषिरुवाच ॥ मार्कंडेयपुराणोक्तं देवीमाहा

उ१
१२

स्यान्नुत्तमं॥ यः एठे कृपयाइकयातस्यमुक्तिर्नो।
क्षेमायः॥९॥ अज्ञानाद्धिसस्तेभ्रांत्वायन्नमा
धिकं कृतं॥ विपरीतं तनुतन्मवेत्तमस्वपरस्मेश्च
ति॥१०॥ यस्याः स्मृत्यावचनामोक्षात्तपोयज्ञक्रि
यादिषु॥ स्वनेमेश्रुत्तांतायांतप्रसादात्परमेश्व
ति॥११॥ यदक्षरपदभ्रंशस्वरव्यंजनवर्जितं॥

तत्सर्वं क्षम्यतां देवि प्रसीद परमेश्वरि ॥२२॥ मंत्र
हीनं क्रियाहीनं भक्तिहीनं सुरेश्वरि ॥ यत्त्वतास्मि
मया देवि तस्मात्त्वं वरदा भव ॥२३॥ आवाहनं च
सज्ञां च त्वन्माहात्म्यं जपं तथा ॥ विसर्जनं न जाना
मि चंडिके त्वं क्षमस्व मे ॥२४॥ कामेश्वरि जग
न्माता सच्चिदानंदविग्रहे ॥ गृहाणार्चामिमां

उ॰र॰
१८

सर्वांप्रसीदकरुणानिधे ॥ ५५ ॥ गुह्यातिगुह्यगो
प्त्रीत्वंगृहाणास्मत्कृतंजपं ॥ सिद्धिर्भवतुमेदे
वित्वत्प्रसादात्वयिस्थिता ॥ ५६ ॥ इतिश्रीमार्कं
डेयपुराणेसावर्णिकेमन्वंतरेदेवीमाहात्म्येदे
वीसूक्तजापसमाप्तविधिर्नामसप्तदशोध्यायः
१७ ॥ ८ समाप्तंचेदंरहस्यंसप्तशतिकानि ॥ ३

अथदेवीसूक्तं॥ राजोवाच॥ मुनेकथयसर्वज्ञा
यःकिंचिदद्भुततमं॥ तत्रमेतत्स्यंसर्वंसर्वस्यघेनसि
द्धिरवाप्यते॥ १॥ ऋषिरुवाच॥ भूयःशृणुमहा
भाग देवीमाहात्म्यमुत्तमं॥ विनायेनसत्व
मर्थंनिर्जीवीनृपनंदन॥ २॥ दृष्ट्वासर्वंचनिह
तंदारुणंदेवकंटकं॥ आजग्मुःपरमानंदत्र

दु.स.
५९

त्वा विस्मयमहेश्वराः ॥ ३ ॥ देवीस्तुतिं समाधाय।
गतेनालक्ष्यसंयुताः ॥ आज्ञामादाय देवेशाः क
र्त्तुं दर्शनमादरात् ॥ ४ ॥ बद्धांजलिपुटाःशान्ता
स्तुष्टुवुः क्रमशः शिवां ॥ लोकानां बहितार्थो
य देवीसूक्तानि पार्थिव ॥ ५ ॥ ब्रह्मा सर्वस्वर्नी
स्तुते लक्ष्मीस्तुतं जनार्दनः ॥ स्तुतं तथा महा।

कालात्माः शंकरः स्वयमब्रवीत् ॥ ९ ॥ ब्रह्मोवाच ॥
अजां पुराणाममरां सनातनीं चतुर्भुजां पुस्त-
कमक्षधारिणीं ॥ वराभयाभ्याममनुग्रोभिहृ-
स्तां नमामि तां जाड्यजडाविनाशिनीं ॥ ८ ॥ स-
रस्वतीं तामनुनौमि वाचं वाचः प्रदां हृत्सरसा-
धिरूढं ॥ स्वकामणिग्रैवेतिनकंठहारां भागैक

उस्तं
२०

लभ्यंतापरमोपविद्यो ॥ श्रींकेंगणनित्रयथेमभा
मानेनादेशास्वतस्वैगारूपतानुरूपो ॥ पंचारवास्तो
मृतभूगरहारांसरस्वतीतांप्रणमामि देवीं ॥ ९
कालावासंश्यामप्रकोटिनाशं विद्युरयथावि
मलैकरुपेभं ॥ स्वक्लावदातां स्फटिकाभरूपां स
रस्वतीत्वांप्रणमामि मातः ॥ ९ ॥ वाक्कामकाये

परमैः पवित्रैरमारमांगीवरदाभंटलैः ॥ बीजैरा
मीभिः कपिवीजयुक्तांल्लीग्रमस्थित्रैरितिमंत्रगा
जः ॥ ११ ॥ एकेन चैकेन चतुरमकेन द्वाभ्यामथैके
न तथैव शोषैः ॥ वरांगलक्ष्मिपरमो नमो यं निह
तिपापानि च साधकानां ॥ दृष्ठेन वैश्रृंखलयाच
शुल्पाविधानरपद्माचनथैव वाचा ॥ श्रीकेनव

उस्र: २१

त्या किलयोभंग्या वस्यास्सेवमीभि: पतितोपि शं
भुः ॥१३॥ इक्षेणाक्षेमात्सकलार्थसिद्धिः स्तुति
शुकैर्वागपिसिद्धिरस्त्वेत ॥ सद्भाग्यसूर्येणपरमा
त्तिवासः स्तुपास्ससेनापिचवेदसिद्धिः ॥१४॥ न
चावतेमहिमानंवदामि: सरस्वतिप्रथितैलो
कमध्ये ॥ जानंतिकिंतुदाक्षुमितोयेजटाव

यंत्रलग्नहृदीणमस्तकेः ॥ ५ ॥ नथैवद्वाचावयसंवा
दामोक्षिक्षामसामयानथैवावजीवाः ॥ पयपामहे
वोह्मितर्महेशिस्पृगामिसातानविसंयुता
गं ॥ ६ ॥ स्वाद्वविदामसत्वशक्तियोगाद्भ्दीमहेन
तयमशमहेसि ॥ गच्छामहेतवशक्तिप्रभावा
दानंदपुत्कात्मवसत्त्विवेशात् ॥ ७ ॥ आत्मामना

उत्त
२२

त्वंत्वमेवासिदेहस्त्वमेववैचेंद्रियपंचतत्वाः॥ त्वमे
ववैर्विषयःशब्दस्तुत्वः परावरेषांपरमात्वमेव॥
१८॥ रविस्तुते चंद्रमास्तुते नारस्तुते भूस्तुते जलंव
ते तेजस्तुते वायुस्तुते व्योमस्तुते॥ शब्दस्तुते स्पर्श
स्तुते रूपंचते रसस्तुते गंधस्तुते॥ प्राणस्तुते व्यान
स्तुते उदानस्तुते समानस्तुते॥ नागस्तुते कूर्मस्तुते

हृकलश्वनेदेवदत्तश्वतेधनंजयश्चतेभूतात्माचा
ते ॥ ज्ञानात्माचतेसर्वात्माचतेसमचित्तत्वमेव
वित्तिविमलतं ॥ ९ ॥ यदानचाहंभुवनानिजीवा
न्नाहंनविष्णुर्नचपार्वतीशः ॥ नचेश्वरोनापि
सदाशिवश्वत्वमेवचासीदितिचाभविष्यः ॥ १०
कालस्त्वमेवासिजगत्त्रयाणांस्वभाववीर्यादि

उस्तु॰ कंचत्वमेव ॥ त्वमेवविश्वंपरमात्मशक्तिर्नमामि॰
तेपादपीठंस्मरस्वाति ॥ २१ ॥ त्वंवेदवाणीनिखिल
२३ श्रुवेदस्त्वंशाहूशक्तिस्तुतथार्थशक्तिः ॥ त्वंब्रह्म॰
विद्यापिपरावरेशितांब्रह्मशक्तिंशरणंप्रपद्ये
२२ ॥ स्तुकंनवेदंहिभगंस्मरस्वतिप्रातस्तुमध्याह्ने
कालेचसायं ॥ पठंतियेश्रद्धयाहस्तलिखितालेभो

गम्भेतोस्तद्दस्मालभंते ॥ २३ ॥ नतेक्षयोनिंनदवि
इतोवाधर्मात्मादितापंनचसंलभंते ॥ नएवधन्या
स्तएवसुकृताःसर्वत्रमान्यंभवंतीहतेषां ॥ २४ ॥ प
वित्रताणांविरजंसुधामयन्नत्वभृतंजगतांत्रया
णां ॥ तेस्तुवंतिप्रकटप्रभावास्त्वांसर्वयोनिंश
रणंप्रपद्ये ॥ २५ ॥ ऋषिरुवाच ॥ स्तुत्वानयूा

उ.स्तं.
२४

वेद्धामामा सर्वसारस्वरूपया॥ प्रसन्नादेवदेवेशी
महाहूवीसरस्वती॥२६॥ आविर्भूतामहादेवीब्र
ह्मतोषैककारिणी॥ उवाचवचनंदिंव्यंब्रह्मा।
नंदप्रदायकं॥ श्रीदेव्युवाच॥ स्तुत्यानयाचतेः
ब्रह्मन्स्वंतोषसमन्विता॥ स्तुतास्मिब्रीयतां
देववरंसंतोषकारकं॥२८॥ ब्रह्मोवाच॥ नदा

क्षेमेमनोदेवीहृष्टंभवतुसर्वदा॥ एवमेववरः।
साताउनमोम्रियतेमया॥३०॥ स्वस्वकेचापिदे
वेशीतेज्ञोदिष्येविधीयतां॥ येनकार्याणिसिध्यं
तिसाधकानांमहात्मनां॥३१॥ श्रीदेव्युवाच॥ स
र्वदातेमनोदेवाऊर्जलधर्मसंयुजिते॥ हृष्टंभवतु
सततंचप्रसादात्मेपरंतपः॥३२॥ सर्वसिद्धिप्र

दु.स.
२५

दंत्वास्मत्परमानंददायकं ॥ विनाशकं पठेद्यस्तु ।
स्तोत्रं सप्तशतीति च ॥ २३ ॥ मातृगामी स विज्ञेयो
नरकावासतत्परः ॥ समैवाज्ञापरोऽज्ञेन ब्रह्मलो
कं गतिं व्रजेत ॥ २४ ॥ ऋषिरुवाच ॥ एवमुक्त्वा
वचो देवी तस्मीमासाद्रूपो नम ॥ २५ ॥ इति सर।
स्वती सूक्तं संपूर्णम् ॥ प्रथ्यांजलिं समाधाय हरि

प्रोवाचविश्वकृत॥श्रीहरिरुवाच॥परावरेशंज
गदादिभूतंमहामलक्ष्मीधरणीधराणां॥अना
दिमादिंपरमार्थरूपंत्वांविश्वयोनिंशरणंप्रपद्ये
३५॥एकामनेकांविविधांसकार्यांसुकारिणीं
सदसद्रूपिणींच॥रूपामरूपांचशिवांशिवप्रदां
त्वांविश्वयोनिंशरणंप्रपद्ये॥३६॥सर्वाश्रयांस

उस्त्रं
२६

वेंजगन्निवासं श्रीमन्महालक्ष्मिमनादिदेवं ॥ शा
क्तिस्वरूपं च शिवस्वरूपं त्वां विश्वयोनिं शरणं प्र
पद्ये ॥ ३७ ॥ कामाभिधाधीश्वधिकं सप्तलाक्षेंद्रपि
णीकपिबीजप्रभावं ॥ कर्णाहृबीजं परमार्थसं
ज्ञां त्वां विश्वयोनिं शरणं प्रपद्ये ॥ ३८ ॥ वैश्वानरा
ग्नीसहितेन देवी श्रीमंत्रराजेन विराजमानं ॥

सर्वार्थदात्रीं परमां पवित्रां त्वां विश्वयोनिं शरणं प्र
पद्ये ॥ ३९ ॥ त्रिकोणपंचारयुगप्रभावां षट्कोणसि
श्रोद्दिदशारयुक्तां ॥ अष्टारचक्रादिनिवासभूतां
त्वां विश्वयोनिं शरणं प्रपद्ये ॥ ४० ॥ पुनर्दशारद्वि
तयेन युक्तां पंचारकोणांकितभूगृहांस्त्वं ॥ थया
धिवासामपि यंत्ररूपां त्वां विश्वयोनिं शरणं प्रप

ध्ये॥४१॥संभावितोसर्वदान्यासमगम्यासर्वस्वरूपा
मपिसर्वमेशं॥सर्वात्मकंन्यासवक्षंणंवविश्वांतेः
विश्वयोनिंशरणंप्रपद्ये॥४२॥सृष्टिस्थितिप्रल
यैस्यैस्वबीजेन्यासंविधायप्रजपंतियेत्वां॥तप
वराजेंद्रनिहृष्टपादाविद्याधरेंद्रस्पशोभांलभंते
४३॥प्रदक्ष्यंत्रविधिनामहेशिसम्याःसमस्ताःप

रमेश्वभारण्याः ॥ जपंतियेत्वांविविधार्थंधात्रीत्वप
वधन्याःऊरुमार्गेनिष्ठाः ॥ ४४ ॥ जानंतिकेपापव
ल्लेऊनूणाब्रह्मादिगीतेमहिमामहेशि ॥ केचिन्म
हांतोनिजधर्मलाभाज्जानंतितेदेवपरंस्वधाम ॥
४५ ॥ विधायकुंडंविधिनास्थंडिलेवासोगंधिहो
मंसमपलंप्रकुर्वते ॥ त्वत्तोषणाज्जायतेभारणमा

उस्तः
२८

यत्तेषां महादेवैरपियोगगम्यं ॥ ४६ ॥ पुनस्तानि प्रय
त्नो विश्वसारास्त्राद्यैरुद्रादैः कुलयोगयुक्ताः ॥ नव
वधन्यः परमार्थभाजो भोगस्य मोक्षस्य करोति
तेषां ॥ ४७ ॥ ऋषिरुवाच ॥ इति श्रीस्तुतयादेवीं
महालक्ष्मीं दृढमानसः ॥ चतुर्भुजां त्रिनयनां मा
हिषासुरघातिनीं ॥ ४८ ॥ अस्य श्रीमन्महालक्ष्मी

प्रसन्नास्तुतिगौरवान् ॥ उवाचस्मितेशोभाढ्या
नारायणमजेशुभं ॥ ४९ ॥ श्रीदेव्युवाच ॥ वरंवर
यदेवेशनारायणसनातन ॥ हास्यामघाभिदा
नवेतवस्तस्मावशीकृता: ॥ ५० ॥ नारायणउवा
च ॥ मात: परमकारुण्ये महालक्ष्मीवरप्रदे ॥
कुलाचारेमतिर्मेस्तुहठंतेस्तुतयाशिवे ॥ ५१ ॥

तवत्तेंचसफलेनवसुधीतिकारणं॥श्रीदेव्यु
वाच॥वरमेतन्महाभागनारायणसनातन॥
५२॥सूत्रमेनाद्दिनायस्तुपठेत्सस्थानीनरः॥
सयातिचमहाघोरंनरकंदारुणंकिल॥५३॥
लिख्यतेपरमंपापंसमक्रोपविहारिणंतः॥ल
क्ष्मीस्तोत्रंविनासप्तशतीस्तोत्रंनिषिध्यते॥५४

ऋषिरुवाच॥ एवमुक्त्वा वचो देवी तस्थौ भगव
तान्तप॥ इति महालक्ष्मीस्तं संपूर्णं॥ ततो
ञ्जलिं समाधाय शिवा वाचमुदाहृतः॥५५॥ ब्र
ह्मा वचोभिर्वोरिद्ध्या महाकाली महेश्वरः॥ वे
दवाणीस्तुतस्त्वाभिर्लोकानां हितकाम्यया॥५६
श्रीशिवउवाच॥ शिवा मन्निर्देशा विविध प्रभा

उस्तु:
३०

वंकालींकलींकपालिंनीविश्ववंद्यां ॥ कपालखट्वा
ङ्गधरींनरमुंडमालांविभूषणंमृगचर्मशोभं ॥ २
रक्तश्रुक्कमांसमावशावासनस्थांविभीषणांभीषयं
तीस्तनावीन् ॥ रक्तप्रियांमांसमदांविद्युतांका
लीसारगांचशावलंब्रजास्मि ॥ ५८ ॥ स्वघोरबीजंव
कपीश्वरैस्तुचिंतामणिकल्पकामरूपं ॥ वि

ग्राचविशेषपुनःकामराजेकामःकलाकामिनी
कामराजे ॥५९॥ वङेवध्मंत्रस्तजोयमीशेविश्व
पुनाप्तीश्वरिदेविवंदे ॥ मंत्रेनचानेनसिध्यंतिस
र्गातसिद्धयःसर्वजगन्निवासे ॥६०॥ पंचारपुरमं
त्रयिकोगांपुरमंपुनस्त्रुपंचारपुगेनबद्धं ॥ का
लाप्रकोपेकिलभूग्ददंवयंप्रेश्वरंतेचपराज्ञाः

उस्तं
३१

तां ॥६१॥ संपूर्णयंत्रेनवविश्वनायिकेस्मिःपा
त्विनःसदस्तासंभवेति ॥ येसाधकास्तवस्माःग्रो
नुस्मातिगाक्जलान्नुहृन्याःपवमापविशाः ॥६२॥
नेसिद्धिसद्धिंवयशोनुगस्यान्नृणांवशीकृत्म
गसांतिभूपा ॥ समस्तसंप्रेमाविधायवोगन्मा
साहिवंभक्तिविस्तभावपुक्ता ॥६३॥ नैकिंका

रीकृत्यगणांतिदेवासनीश्रजगास्येवविभूतिग्रा
मे ॥ वदामिनान्येनशृणोतिचान्यंगणामिना
न्येनविचिंतयामि ॥१४॥ स्मरामिनान्येनभवा
मिचान्यंध्यायामिनान्येनवितर्कयामि ॥ गाया
मिनान्येनतवपादमंभ्रात्वांविश्वयोनिंशरणंप्रप
द्ये ॥१५॥ येषांनदेवंत्वमसिहृदासिदेवीनानाथयंती

दुस्तं
३२

हृद्यैकृतुद्धयः ॥ ग्रंथनमप्रविशांतेमहात्मेमाद
र्शनेतेषडुरात्मनानां ॥ ११ ॥ ऋषिरुवाच ॥ इति
वाक्यंसमाकर्ण्यपरमात्मस्तनसंस्मिते ॥ प्रसन्नाभ
महालक्ष्मीश्वंभोगानंददायिनी ॥ १२ ॥ प्रसन्ना
परमाह्लादसंयुताशिवभाषणात् ॥ श्रीदेव्युवा
च ॥ ध्रियतांमनसोभीष्टोवरोजगतिदुर्लभः ॥

दास्यस्यद्याभिदेतव्यंतवस्तुत्यावंशीकृता॥श्रीशि
वउवाच॥उल्लाचारेनतेदेविमतिर्मेस्तुकदाच
न॥शिथिलादेवदेवेशिपास्तंचसफलंतव॥७०॥
देव्युवाच॥एवमस्त्वितिचोक्ताहितिरोदेव्याः।
सनातनः॥श्रीतद्दिमाप्युपरमाएकस्मिन्नास्थि
ताभवेत॥७१॥ग्रथतान्स्तववतोदेवान्सोवाचवृद्ध

दु.स.
३३

नेसुदा ॥ संतोषयंतीचमुरूलोकान्नुग्रहतत्परा
७२ ॥ शृणुध्वंश्रीतिसंयुक्ताब्रह्मविष्णुमहेश्वराः
देवीसूक्तंपरंध्यायन्भविष्यतिवरार्पदे ॥ ७३ ॥
देवीसूक्तंविनादेवायेचसप्तशतींनराः ॥ श्रोष्यं
तिचपठिष्यंतितेषांशापःपदेपदे ॥ ७४ ॥ देवी
सूक्तंविनापाठोसुरपानेवोदत्तंयथा ॥ श्लोकोह्ना

वैरम्बानेन पूर्णं स्तोत्रमभूदिदं ॥ २७ ॥ देवाकृत
मातः समस्तघात्री स्तोत्रं फलस्तुतिमिहोच्यते ॥ ।
मां समाकर्ण्य जीवानां विस्मासो जायते भृशं ॥
ऋषिरुवाच ॥ इति वाक्यं समाकर्ण्य ब्रह्मविष्णु
शिवोदितं ॥ फलस्तुतिं यथोवाच स्तोत्रस्यास्य
महात्मने ॥ २८ ॥ इति श्री मार्कंडेयपुराणे दे ॥

देसू:
३४

वीतस्कंसंपूर्णं॥ २ ८ ३ ८ २ ८ २८ ओं नमः श्रे
विके॥ ओं अग्रहमसोवायामित्रीतस्थावात्मानो
द्वितीयाजगतीनतंसोलपालोहकल्पवद्विधो
वामदृग्भोवाअग्रहमोग्वैश्वदेवस्पपरिहाताबाह
हृतंमेत्यातिष्टुप॥ २॥ ओं अग्रहंरुद्रेभिर्वसुभिः
श्चराम्यहमादित्यैरुतविश्वदेवैः॥ अहंमित्रा

वरुणोभा विभर्म्यहमिंद्राग्नी अहमश्विनोभाम् ॥
अहं सोममाहनसं विभर्म्यं ॥ हं त्वष्टारमुत पूषा-
णं भगम् ॥ अहं दधामि द्रविणं हविष्मते सुप्रा-
व्ये यजमानाय सुन्वते ॥ अहं राष्ट्री संगमनी वसू-
नां चिकितुषी प्रथमा यज्ञियानां ॥ तां मा देवा व्य-
दधुः पुरुत्रा भूरिस्थात्रां भूर्यावेशयंतीम् ॥ मया ।

दे.सू. सोन्नमत्तियोविपश्यतियःप्राणीतियईंशृणो
३५ त्युक्तं॥अमंतवोमांतउपक्षियंतिश्रुधिश्रुतः
श्रद्धवंतेवदामि॥अहमेवस्वयमिदंवदामि
जुष्टंदेवेभिरुतमानुषेभिः॥यंकामयेतंतमु
ग्रंकृणोमि॥तंब्रह्माणंतमृषिंतंसुमेधां॥अ
हंरुद्रायधनुरातनोमिब्रह्मद्विषेशरवेहंतवा।

वाउ॥ अहंजनायसमदंकृणोम्यहंद्यावापृथि
वीआविवेश॥ अहंसुवेपितरमस्यमूर्धन्मम
योनिरप्स्वन्तःसमुद्रेततोवितिष्ठेभुवनानिवि
श्वोतामूंद्यांवर्ष्मणोपस्पृशामि॥ अहमेववा
तइवप्रवाम्यारभमाणाभुवनानिविश्वा॥
परोदिवःपरएनापृथिव्यैतावतीमहिनासं

ल.
३६

वेषुव ॥ ८ ॥ इत्यंबिकासूक्तं ॥
श्रीगणेशाय नमः ॥ अथ ध्यानं ॥ ॐ देवीं कदंब
वनगामरुणां त्रिकोणसंस्थां स्मितां सितत्वरांबु
जकर्णिकस्थां ॥ सत्सलकानवलयांकितपा
णिपद्मां वागीश्वरीं कुलगुरुं प्रणमामि देवीं
इति ध्यानं ॥ ऐं ह्स्रैं वशगतासनस्थदेवतीमः ।

धे ललाटपद्मे ॥ सो ज्ञी कांति मंतुसगो विवशि
रस्या तन्वन्ती सर्वतः ॥ एषा सो त्रिगुणा हृदिस्थि ति
त्रिवोल्लाणा सदा हृस्थिता ॥ त्रिधा नः सहस्रापदे
त्रिभिस्त्वं ज्योतिर्मयी वाग्मयी ॥ १ ॥ यामात्राज्ञ७
सोलतानन्नुलसतंतत् स्थिति स्पर्धिनी ॥ वाग्वी
जे प्रथमे स्थिता तव सदा तातस्मन्म हेते वयं ॥ सा

क्लिः कुंडलिनीतिविश्वजननव्यापारबद्धोद्यमां
ज्ञात्वेत्थंनपुनःस्पृशंतिजननीगर्भेर्भकत्वेनराः॥
२॥ दृष्ट्वासंभ्रमकारिवस्तुसहसाऐऐइतिव्याहृ
तं॥ येनाकृतवशात्दपीहवरदेबिंदुंविनाप्यक्ष
रं॥ तस्यापिध्रुवमेवदेवितरसाजातेतवानुग्र
हे॥ वाचःसूक्तिसुधारसद्रवमुचोनिर्यांतिवक्त्रां

ब्रुजात ॥ ३ ॥ यन्निमेतवक्तामराजंसपरंमेद्राद्व
रंतिकुले ॥ तस्मात्स्वतमित्यवैतिविरलः कश्चि
द्विपश्चिद्गुवि ॥ आत्मानंप्रतिपर्वसत्यतपसोया
सीतंयंतिद्विजाः ॥ प्रारंभेप्रणवास्पदप्रणयितां
नीत्वोच्चरंतिस्फुटं ॥ ४ ॥ यत्सद्योवचसांप्रहृत्तिक
रणेदृष्टाप्रभावंवुधैः ॥ तार्तीयंतदहंनमामिमा

लें ३८

तस्मायद्वीजसिंदुप्रभं ॥ अप्रस्तोवोपिसरस्वतीमा।
नुगतोज्ञांशंतुविक्लिनये ॥ गौःप्राह्वालितिवर्त्तं
तेसतनियतंयोगांविनासिद्धिदः ॥ एकैकंतवदे।
विवीजमनंतेसव्यंजनाख्यंजनं ॥ कूटस्थंयदिक्ष
पृथक्क्रमगातेयद्वास्थितंस्तुतकमात ॥ यंयंका
मममवेद्ययेनविधिनाकेनापिवाचिंतितं ॥ ज

मेवस्यफलंकरोतिसततंतंतेसमंस्तेनुणां॥६॥
वांमेभक्तकथारिणीमभयदांसानंदसंजेदक्षिणे
भक्तिभ्योवरदानपेशलकरांकर्पूरकुंदोज्वलां॥
उज्जृंभांबुजपत्रकांतनयनस्निग्धप्रभालोकि
नी॥ येत्वांसंवनपीलयंतिमनसातेषांकवित्व
उतः॥७॥ येत्वांपाण्डुरपुंडरीकपटलस्पष्टाभि

ल॰ ३९

रामप्रभां॥ स्निंचंतीमम्रतइवैतिवस्निनेधप्रयंति
भूर्मिस्थितो॥ श्राश्रांतेविकटस्फुटाललरपटोलि
यंतिवक्त्रांबुजातं॥ तेषांभासतिभावतोसवस
तिल्कलोललोलोर्मिवत्॥ ८॥ येस्निंहर्पराग॥
पुंजमपिहिंतांतवतेजसाधामिमं॥ उवींचापि
किलीनयावकरसप्रस्तारमग्नामिव॥ पर्यपंति

त्तरुमप्यनन्यमनसोतेधामनंगज्वर॥ क्षांता
ल्लुमञ्जरंगयशाद्दकटुशोवशणाभवंतिस्फुटं॥ ९॥
वेवक्लांचनझंडलांगदधरमावह्नकांचीस्र:
जः॥ येत्वांवेनमितझतेत्तलममपिध्यायंतिमूर्धि
स्थितां॥ तेषांवेश्मसुविभ्रमादह्रवहः स्फारैभ
वेत्याश्रिते॥ माघकेजरकर्णतालतरलाःस्थे

लं. ४०

यं भजंति शिवं ॥१०॥ आर्भट्या शाखिखंडमंडिता
जटाजूटानमुंडस्रजं ॥ बंधूकप्रसवारुणांबर
धरां प्रेतासनाध्यासिनीं ॥ त्वां ध्यायंति चतुर्भु
जां त्रिनयनामापीनतुंगस्तनीं ॥ मध्ये निम्न
वलित्रयांकिततनुं त्वद्रूपसंवित्तये ॥११॥ जातो
ऽप्यल्पपरिछदे क्षितिभुजां सामान्यमात्रे कुले।

ति: क्षोणावनिचक्रवर्त्तिपदश्रीलब्धाप्रतापोन्न
तः॥ यद्विद्याधरहंदवंदितपदः श्रीवत्सराजोभ
वद्देवित्वच्चरणांबुजप्रणतिजः सोयंप्रसादो
दय:॥१२॥ चंडित्वच्चरणांबुजार्चनविधौ बिल्वी
दलोल्लेठनात्॥ त्रुट्यत्कंठककोटिभि: परिचया
येषां न जग्मुः कराः॥ ते दंडांकुशचक्रचापकुलि

ले
४१

षाश्रीवत्समत्स्यांकितैः॥ जायंतेपृथिवीभुजः।
कथमिमोभोजप्रभैःपाणिभिः॥ २३॥ विप्रान्तो
णिभुजोविप्रस्लाटदिनरेद्धीराज्यमध्यासवैः॥ त्वं
देवित्रिपुरेयमपरकलांसंतर्प्यप्रज्ञाविधौ॥ ये
षांप्रार्थयतेमनःस्थिरधियांतेषांतपवध्रुवं॥ ।
तांतांसिद्धिमवाप्नुवंतिनरसाविप्रेरविप्रोहः

ताः ॥१४॥ काह्ना नांज्ञ न नमीत्व मत्र भवने वाग्वादि।
नीत्र च्यसे ॥ त्वमः केशव वासव प्रभ्म नयो प्मावि।
भंवंति स्फुटं ॥ लीयंते त्व लयय त्र कल्प विरमे ब्रह्मा
दयस्ते प्यमी ॥ स्तात्व काचि विदचिंत्य रूप महिमा।
शक्तिः परागीयसे ॥१५॥ देवानां त्रितयं त्रयी हुत
भुजां शक्ति त्रयं त्रिस्वरः ॥ त्रैलोक्यं त्रिपदी त्रिपुष्क

ले: रमथस्त्रिद्धस्त्वं गर्भस्त्रयः ॥ यत्किंचिज्जगत्मिन्त्रि
४१ धामनियतं वृत्तं त्रिवर्गात्मके ॥ तत्सर्वं त्रिपुरेति
नाम भगवत्या न्वेति तेतन्ननः ॥ १६ ॥ लक्ष्मीराजकु
लेजयांरणभुवि क्षेमंकरीमध्वनि ॥ क्रव्यादद्विप
सर्पभाजि शबरीकांतारदुर्गे गिरौ ॥ भूतप्रेतपि
शाचजंबुकभये स्मृत्वा महाभैरवी ॥ व्यामोहे त्रि

ष्टांतरंतिविपदंस्लारांचतोयस्रवे ॥१७॥ माया-
कुंडलिनीक्रियामधुमतीकालीकलामालिनी
मातंगीविजयाजयाभगवतीदेवीशिवाशांभ-
वी ॥ शक्तिःशंकरवल्लभात्रिनयनावाग्वादिनी
भैरवी ॥ ह्रींकारीत्रिपुरापरापरमयीमाताकुमा-
रीत्यसि ॥१८॥ आईंपल्लवितैपरस्परयुतैः द्वि-

ले
५२

त्रिक्रमाद्यलैः ॥ क्रोधैः शान्तगतैः स्वरादिभिरथै
लांतैश्च तैः सतैः सवैः ॥ नामानि त्रिशरेभवेतिस्व
लयान्वत्यतगुह्यानि ते ॥ तेभ्यो भैरवपत्नि वि
शान्ति समृद्ध्ये भ्योपरेभ्यो नमः ॥ ५ ॥ बोद्ध्यानि
ष्णोंबुधैः स्तुतिरियं कृत्वा मनसा कृते ॥ भाव
त्वास्त्रिशरेत्पन स्वमनसोपयायदुर्नैस्कुट ॥ ६

तर्जनीभ्यां नमः ॥ ॐ ह्रुं माहेश्वर्यै मध्यमाभ्यां नमः
ॐ ह्रैं वज्रहस्तायम्रनामिकाभ्यां नमः ॥ ॐ ह्रौं सह
स्रनयनायैकनिष्ठिकाभ्यां नमः ॥ ॐ ह्रः इन्द्राणीभ
गवत्यै करतलकरपृष्ठाभ्यां नमः ॥ इति करन्यासः ॥
ॐ ह्रां लक्ष्म्यै हृदयाय नमः ॥ ॐ ह्रीं भुवनेश्वर्यै शिर
से स्वाहा ॥ ॐ ह्रुं माहेश्वर्यै शिखायै वषट् ॥ ॐ ह्रैं व

इं
३५

ज्वहस्तायकवचायहुं॥ॐक्लौंसहस्रनयनायने
त्राभ्यांवौषट्॥ॐफःइंद्राणीभगवत्यैअस्त्रायफ
ट्॥ॐभूर्भुवःस्वरोमितिदिग्बंधनंकृत्वा॥ध्या
नं॥इंद्राणीद्विभुजादेवीपीतवस्त्रधरांशिवा
वामहस्तेवज्रधरांदक्षिणेचवरप्रदां॥सहस्रने
त्रासूर्याभ्यां.नानालंकारभूषितां॥प्रसन्नवदना

तित्यामस्त्ररोगणमेवितां ॥ श्रीदुर्गांसोम्यवदनां
पद्मशंखकुशाधरांपरां ॥ त्रैलोक्यमोहिनीं देवींभवा
नीशाममाश्रयं ॥ इति ध्यानं ॥ ॐ ह्रीं श्रीं इंद्राणी ह्रीं
श्रीं ह्रां ऐं स्वाहा ॥ इति मंत्रः ॥ ईश्वर उवाच ॥ इंद्राणीना
मसादेवी देवतसमुदाहृतः ॥ गौरी शाकंबरी देवी
दुर्गानाम्नेतिविश्रुता ॥ ४ ॥ कात्यायनी महादेवी चं

पु.
४६

उग्रामहातपः॥सावित्रीसाचगायत्रीब्रह्माणी।
ब्रह्मवादिनी॥२॥नारायणीभद्रकालीरुद्राणी
कृष्णपिंगला॥अग्निज्वालारौद्रमुखीकालरात्रि
स्तपस्विनी॥३॥मेघश्यामासहस्राक्षीविष्णुमा
याजलोदरी॥महोदरीमुक्तकेशीघोररूपामहा
बला॥४॥आनंदाभद्रजानंतारोगहर्त्रीशिवप्रि

या ॥ शिवदूती कराली च अनन्ता परमेश्वरी ॥ ५ ॥ इं
द्राणी इंद्ररूपा च इंद्रशक्तिपरायणा: ॥ वाराही ना
रसिंही च भीमा भैरवनादिनी ॥ ६ ॥ श्रुतिः स्मृति
धृतिर्मेधा विद्या लक्ष्मी सरस्वती ॥ अनंता विजया
ऽपर्णा मानस्तोकापराजिता ॥ ७ ॥ भवानी पार्वती
देवी हैमवत्यंबिका शिवा ॥ एतैर्नामपदैर्दिव्यै: स्तु

नाम्नाक्रेणधीमता ॥ ८ ॥ आयुरारोग्यमैश्वर्यं सुतं स-
पत्निकारकं ॥ तथापस्मारकुष्ठादितापज्वरविना-
नं ॥ ९ ॥ शतमावर्तयेद्यस्तु मुच्यते व्याधिबंधनात्
आवर्तयेत्सहस्रेण लभते वांछितं फलं ॥ १० ॥ ल-
मेकं जपेद्यस्तु साक्षाद्देवी भविष्यति ॥ त्रिकालं पठ-
ते यस्तु धनधान्यादिसंपदः ॥ ११ ॥ पंचस्तवमिदं पु

णं जपेत्फलवर्धनं ॥ त्रिनामपाठ्यां त्रिघोराणां ऋप
स्मृतहराय च ॥ राज्यार्थी लभते राज्यं धनार्थी विपु
लं धनं ॥ इदं मया कथितं स्तोत्रं सत्यमेव न संशयः ॥ २
इति श्री स्कंदपुराणे काशीखंडे देवश्रोक दशाक्षरी स्तो
त्रं संपूर्णम् ॥ शुभमस्तु सर्वदा ॥ ॐ ॐ ॐ ॐ ॐ ॐ

जयंती मंगला काली भद्रकाली कपालिनी दुर्गा क्षमा [illegible] ॥